# JAHNAVI SANSKRIT E-JOURNAL





**WELCOME TO**

## Jahnavi Sanskrit E-Journal (जाह्नवी संस्कृत-ई-शोधपत्रिका)

A Peer reviewed, Refereed Journal Since 2010, **ISSN**- 0976-8645, **UGC RN**-41039, CARE & SCOPUS Applied, Vol-II, Year-14

**Website-** http://www.jahnavisanskritejournal.in/, DIO- 54.pdf (jahnavisanskritejournal.in)

E-Mail- jahnavisanskritjournal@gmail.com , Mob : 831-815-4948



## प्रकृताङ्ककार्यकारी-सदस्याः

| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति डा सदानन्द झा |
| **सम्पादकाः** | डा सुमन् के. एस्. डा दीपिका दीक्षित, डा बिपिन कुमार झाः |
| **पुनर्वीक्षकाः** | Dr.Radhavallabha, Dr. Amit, Dr. Rajesh, Dr. Shashi, Dr. Ramesh Chandra Nailwal, Dr Sudarshan Chakradhari, Dr Sachin |
| **विशिष्टपुनर्वीक्षकाः** | प्रो. कमलेश चौकसी |
| **प्रकाशकः** | सारस्वत-निकेतनम् |
| **प्रतिनिधयः (लोकार्पणसन्दर्भे)** | डा सुमन के एस् |
| **तकनीकिप्रवन्धनसहायकः** | रित्ज़ वेब होस्टिंग, बंगलोर, डी नेक्स्ट्, बिहार, श्री मनीष मिश्र |


सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# पत्रिकापरिचयः

संस्कृतगङ्गेयम्पुरा कदाचिदिह भारतेऽजस्रम्प्रवहन्ती पुनरपि जगद्धिताय अमरलोकात् वतारणीया इत्यभिज्ञया एव अयं प्रयासः। इदं (सारस्वत-निकेतनमित्याख्यं जालपुटं संस्कृत-प्रेमिभि: संस्कृत-प्रेम्णा संस्कृत-प्रेमिणां कृते निर्मितम्। अतो यदि भवति संस्कृत-प्रेम अस्ति तर्हीदं भवत एव । संस्कृत-प्रेममात्रमपेक्षते न तु पाण्डित्यम् । आयान्तु, वत्सा इव संस्कृतकपिलाम्प्रति पुनरपप्युन्मुखो भवाम। तदैव वयम्भारतीयास्संस्कृत-मातुर्दिव्यपयसा पुन पुष्टम्भारतम्परमवैभवम्प्रापयन्तो विश्व-कल्याणं सिसाधयिष्यामः। जालपुटेऽस्मिन् सर्वे संस्कृत-प्रेमिण एकत्रीभविष्यन्ति । संस्कृत-गीतानि, संस्कृत-नाटकानि, संस्कृत-साहित्यम्, चर्चाः, संस्कृत-लेखनम्, पठनम्, तथा च यद्यद्वयञ्चिन्तयितुं शक्नुमस्तत्तदत्र मिलित्वा कर्तुं शक्यतेति एव अस्माकं दृष्टिरस्ति । सर्वेऽप्यनेन जालपुटमाध्यमेन सोत्साहं संस्कृत-संवर्धनाय कार्यरतो भविष्यन्तीति विश्वासेनेदमाह्वानम् । सारस्वत-निकेतनमित्यन्तर्गतविविधजालपुटानामन्वितिरस्ति। प्रकारान्तरेणेदं सारस्वत-निकेतनमित्याख्यं जालपुटङ्केन्द्रीयजालपुटरूपे विद्यते।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# विषयानुक्रमणिका


- पत्रिकापरिचयः ........ 1
- सम्पादकीयम् ........ 3
- प्रकाशकीयम् ........ 5
- वैदिकयुगे भारतीयशिक्षापद्धतिः ........ 6
- संस्कृत एवं स्वास्थ्य विज्ञान ........ 14
- कोटा क्षेत्र की मूर्तिकला में प्रदर्शित आभूषण ........ 33
- भारतीयवैज्ञानिकचिन्तनम् ........ 44
- विष्णुधर्मोत्तरपुराणे प्रतिपादितानां कर्मकाण्डविषयाणां परिचयः ........ 51
- Ideologies Appreciated by Westerners from Dvaita Vedanta ........ 74
- Indian Goddesses ........ 89
- India Is Still A Slave to British Laws Despite 75 Years of Independence. ........ 99
- Deciphering Crime : An Examination of Moral Offenses in Smriti Literature ........ 104
- Relevance And Need of Indian Knowledge Tradition in Contemporary Education System ........ 111
- आचार्यस्य केशवाचार्यस्य कृतित्वम् ........ 122
- Rama Rajya: Precepts for Rulers in the Ramayana ........ 138
- वेदानुसार प्रकृति-मनुष्य के सम्बन्ध की उपादेयता ........ 157
- शैवसम्प्रदायः शैवाचार्याश्च ........ 163
- संस्कृतवाक्यगठने वाक्यार्थबोधे च कारकविभक्तीनां गुरुत्वम् ........ 174

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# सम्पादकीयम्

*सृष्टौ या सर्गरूपा जगदवनविधौ पालनीया च रौद्री*
*संहारे चापि यस्याः जगदिदमखिलं क्रीडनं या पराख्या।*
*पश्यन्ती मध्यमाऽथो तदनु भगवती वैखरीवर्णरूपा*
*सास्मद्वाचं प्रसन्ना विधिहरिगिरीशाऽराधितालङ्करोतु।*

अये वास्तविकविवेचनचणा विचक्षणाः विद्याविद्योतितान्तःकरणाः विद्वद्वरेण्याः सुरसरस्वतीपदपद्मानुरागिणः सुधियः पाठकाश्च।

विश्वस्य सर्वप्रथमान्तर्जालीय ई-मेल संस्कृतत्रैमासिक-जाह्नवी-पत्रिकायाश्चतुः-पञ्चाशदङ्कमिमं सुरसरस्वतीसेवापरायणानामाचार्याणां विविधबुधवन्दितचरणानां करकमलयोः समर्पयन् अमन्दमानन्दमनुभवामि।

जाह्नव्याः पत्रिकायाः संकलनसम्पादनादिभारः विविधराज्यानामन्ताराष्ट्रिय-कतिपय-लब्धख्यातीनां सारस्वतसाधकानां हस्ते न्यस्तः तेषाञ्च विशेषानुरोधादहं धुरि नियोजितः तदाज्ञां सोत्साहं शिरसा धारितवान् वार्धक्येपि वयसि । विविधमहापण्डितानां साहाय्येनेयं पत्रिका पञ्चदशवर्षात् सञ्चालिता विद्वत्समाजे सुप्रतिष्ठिता वर्तते । एतर्हि पत्रिकामिमां माध्यममासाद्य देशे महत्त्वाधायिनः संस्कृतग्रन्थाः अनूद्यन्तेऽभिनीयन्ते प्रचार्यन्ते सम्मान्यन्ते च। पत्रिकेयं संस्कृतप्रचार-प्रसारे बद्धपरिकरा राजनीतिविमुखा आक्षेपरहिताश्च जानन्त्येव पाठकाः शास्त्ररसिकाः। पत्रिकायाः अस्याः प्रारंभकालादेव लोकार्पणप्रक्रिया सुरभारत्याः परितः प्रसाराय समारब्धा । साम्प्रतं वैज्ञानिकसाधनं सौलभ्यात् समस्ते जगति कुटुम्बायमाने लोकार्पणकार्यक्रमाः देशे विदेशे च झटित्येव सर्वत्र ज्ञापिता भवन्ति। एतदर्थं विभिन्न देशे-विदेशे लोकार्पणकार्यक्रमः यथा सप्ताचलाधिपतेः पुर्यां, तिरूपतौ, वाराणस्यां, मिथिलायाम्, अमेरिकास्थ-अटलाण्टानगर्यादिषु संजातः।

अस्माकं परमसौभाग्यवशादस्याङ्कस्य लोकार्पणाय श्री श्री 1008 विश्वप्रसन्नतीर्थस्वामिभिः पेजावरमठउडूपिस्थैः अयोध्यायां श्रीरामप्रतिष्ठापनप्रमुखैः गुरूवरेण्यैः कृपानुमतिः प्रदत्तास्ति। अत एतान् महर्षिप्रवरान् सादरं जाह्नवीपरिवाराः वयं वन्दामहे सादरं सश्रद्धञ्च।

Since 2010
ISSN- 0976-8645
UGC RN-41039

जाह्नव्याः अस्याः लोकार्पणकार्यक्रम प्रसङ्गे देशे-विदेशे च वसन्तो बहुशो विद्यानुरागिणः अस्मान् मनसा-वाचा-कर्मणा च समुत्साहितवन्तः तेन च शक्तिं प्रेरणामासाद्य पत्रिकेयं सारस्वतरङ्गस्थले नरीनृत्यमाना अस्मद्विचारं भारतीसंस्कृतिसारं परिपोषयति परितः प्रचारयति हृदयं चास्माकं पुनातितराम्।

प्रस्तुताङ्के सप्तदशाधिकशोध-आलेखाः चयनसमित्यनुशंसया समावेशिताः। सर्वे शोधोपयोगिनः गवेषकाय । यद्यपि व्यालमुखवर्तिमणिपरिष्करणमिव संस्कृतपत्रिकासंचालनकार्यं दुष्करं भवति तथापि समेषां विद्वद्वन्धूनामालेखदातृणामाचार्याणां संस्कृतानुरागिणां करावलम्बमासाद्य धवलपक्षशशिकलेव जाह्नवीयं प्रवर्धते । अग्रेऽपि वर्धिष्यत इति में द्रढ़ीयान् विश्वासः। अस्याः पत्रिकायाः संचालने ये प्रत्यक्ष परोक्षरूपेण साहाय्यं कृतवन्तस्तेषां हार्दं हार्दं स्वागतं व्याहरन् चाशिषा संयोज्य विरमत्ययं जनः।

*शिवशिरसि वसन्ती संविदानन्द नीरा*
*हृदय कलुष पुञ्जं प्रक्षिपन्ती विदूरे।*
*सधनतमसि दिव्यं ज्योति रालोकयन्ती।*
*प्रसरतु भुवि भव्या जाह्नवी कापि धन्या ।*

श्रावणी पूर्णिमायाम्
(संस्कृतदिवसः)

श्रैमत्कः
**झोपाख्यः (डॉ. सदानन्द झा)**
प्राचार्यः, जे.एन.वी. लगमास्थ-
आदर्शसंस्कृतमहाविद्यालयस्य

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

# प्रकाशकीयम्

जाह्नव्याः समारम्भः तदानीन्तने काले अभवत् यदा जनाः विशिष्य संस्कृतज्ञा तन्त्रनीत्युपयोगाय बद्धपरिकराः नासन् । पत्रिका विश्वस्मिन् संस्कृस्य भारतीयविद्यायाः वा प्रचारः प्रसारः यथा स्यात् अपि च तज्जन्यज्ञाननिधीनां प्रसारः यथा स्यात् इति धिया विद्युत-पटले (ई-पोर्टलमध्ये) अभवत् । एतस्याः मुद्रितं रूपं नैव भवेत् इत्यपि चिन्तनमस्माकीनम् । तदारभ्य निरन्तरम् इयं पत्रिका अनारतं प्रवहन्ती हसन्ती-लसन्ती अस्मान् उपकुर्वन्ती शोधार्थीनां मनोविनोदं कुर्वन्ती शोधमार्गदर्शनं कुर्वन्ती अस्ति।



अस्मिन् उपक्रमे सहस्राधिकाः संस्कृतानुरागिणः अस्मिन् ज्ञानयज्ञे साहाय्यं विधाय समाजम् उपकृतवन्तः। तेषां सर्वेषां कृते जाह्नवी आधमर्ण्यं बिभर्ति। तेषु एवान्यतमाः आसन् जाह्नव्याः प्राक्तन-विशिष्टपुनर्वीक्षकाः आचार्यप्रवराः पीयूषकान्तदीक्षित-वर्य्याः । एते सर्वदा सर्वथा जाह्नवी-हितचिन्तकाः आसन्। अस्माकं हतभाग्यवशादेव अकालकालकवलीभूता आचार्यप्रवराः पीयूषकान्तदीक्षितवर्य्याः । जाह्नवीपरिवारः तान् आचार्यप्रवरान् साश्रुनिवापाञ्जलिं सश्रद्धं स्मरति। मानवमुक्तिदात्री इयं त्रिपथगा नूनमेव तान् आत्मसात्करिष्यतीति मे आस्था।

अस्याः पत्रिकायाः अभिनवाङ्कप्रस्तुतीकरणे येषां प्रयासः तेभ्यो सर्वेभ्यो धन्यवादान् ख्यापयति सकल जाह्नवी परिवारः।

सादरम्

**डा. बिपिन कुमार झा**

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# वैदिकयुगे भारतीयशिक्षापद्धतिः

डा नेपालदासः[1]

**मुख्य शब्द :** – भारतीयशिक्षा, आचार्यः, शिष्यः, उपनिषत्, गुरुः।

**शोधसारः** – देशस्य समाजस्य च उन्नतेः सामञ्जस्यपूर्णपर्यावरणस्य मूलभूता शिक्षा। वैदिकयुगे भारतीयानां सुवर्णयुगः आसीत्। तदा सर्वस्मिन् क्षेत्रे भारतीयानां विस्तारः भूरिशः दृश्यते स्म। किन्तु वर्तमाने तथा दृष्टुं न शक्यते। वैदिकयुगे उन्नतेः कारणमन्विष्यमाने शिक्षा एव तत्र मूलभूता। वैदिकयुगे शिक्षापद्धिः कीदृशी आसीत् इति ज्ञाते सति तदाधारेण भारतस्यापि उन्नतिः साधयितुं शक्यते। अतः मया मम शोधप्रबन्धे सामान्यरूपेण वैदिकसमये शिक्षापद्धतिः प्रतिपादिता। अत्र आचार्यस्य स्वरूपं, प्रकृतिः, छात्रस्वभावः, पाठ्यविषयः, पाठनकौशलमित्यादिनां विषयाणां आलोचना क्रियते।

**भूमिका** - वैदिकयुगे चतुराश्रमेषु शिक्षायाः अधिकारः आसीत् ऊर्द्धत्रयाश्रमिणामेव। उपनयनानन्तरं छात्राः शिक्षालाभार्थं गुरुगृहं तपवनविद्यालयं वा गमनीया आसन्। उपनयनस्याधिकारः ब्रह्माण-क्षत्रिय-वैश्यानामेव। उपनयनमेतेषां द्वितीयो जन्म इति कथ्यते। येषां उपनयनं सम्पद्यते तेषां 'द्विजः' इति उपाधिः। शतपथब्राह्मणे द्विजविषये कथ्यते – आचार्यः शिष्यस्य मस्तके स्वदक्षिणहस्तं संस्थाप्य तस्य मनः भगवद्भावनया पूर्णं कारयति स्म। तृतीये रात्रे आचार्य्यादयं भावः शिष्यस्य मनसि प्रविशति स्म किञ्च सावित्रीमन्त्रेण स्वब्रह्मतत्त्वे उपनितं भवति स्म। अयमेव तस्य आध्यात्मिकः नवजन्मः। उपनयनस्य आध्यात्मिकव्याख्या शतपथब्राह्मणे (11.5.4.12) प्राप्यते। छात्रान् ब्रह्मचारी इति अभिधया विभूष्यते। ब्रह्मचर्यस्यापि केचन नियमाः भवन्ति स्म तान् छात्राः सदासर्वदा पालयन्ति स्म।

उपनयनानन्तरं द्विजस्य वेदपाठे अधिकारित्वमागच्छति। समग्रे शतपथब्राह्मणे उपनयनानन्तरं छात्रः आचार्यस्य तपवनं कथं प्रविशति, छात्रस्य कर्तव्यञ्च

[1] Asst. Professor, Dept. of Advaita Vedanta, Central Sanskrit University, Ekalavya Campus, Agartala

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

किमासीत् एतत् सर्वं विज्ञायते । तत्र उपदेशः क्रियते – अद्यप्रभृतिः ब्रह्मचर्यस्य नियमावलीपरिपालने प्रतिज्ञाबद्धः स्यात्, यज्ञकुण्डे काष्ठदानं करणीयं, आचार्यस्य अधीनं बाध्यञ्च भवेत्, दिवानिद्रा परित्याज्या, जितेन्द्रियश्च भवेत् इति। छात्रः सविनयमाचार्यसमीपं गच्छति स्म। आचार्यः नामजिज्ञासापुरस्सरं छात्ररूपेण तस्य ग्रहणं करोति स्म।

छात्रजीवनं सुदीर्घं यज्ञसदृशम्। पाठः न तु अतिसामान्यः कर्मः अपि तु अध्ययनमेका तपस्या साधना वा। असङ्कोचेन द्विधाहीनचित्तेन वा तस्य भिक्षा करणीया। एतेन भिक्षावृत्तिद्वारा शिक्षार्थिनां विनयस्योत्पत्तिः भवति स्म। शतपथब्राह्मणे उच्यते – भिक्ष्यावृत्या अन्नसंग्रहः करणीयः। अतः सर्व प्रथमं गुरुपत्न्या साकमनन्तरञ्च मात्रा साकं भिक्षावृत्तिः करणीया। पाठानन्तरं होमाग्नौ समित्समर्प्य स्नानान्तरं स्वगृहं प्रति प्रत्यावर्तनं क्रियते। तदा सः स्नातकः इति उच्यते। उपाधिप्रदानकार्यक्रमं समावर्तनमिति कथ्यते। प्रत्यगमनसमये होमाग्नितः एकः प्रज्वलितः काष्ठखण्डः स्वीकृत्य गच्छति स्म। येन पवित्रः गार्हपत्याग्निः प्रज्वलितो भवति।
वैदिकसाहित्ये उपनिषद्ब्राह्मणेषु बहूनां छात्राणां नामानि प्राप्यन्ते। ते च आरुणिः, भृगुः, श्वेतकेतुः, नचिकेता, सत्यकामः, नाभानेदिष्ठः, नारदः, शौनकः इत्येते प्रसिद्धाः। आत्मत्यागः सेवा परमज्ञानस्य कृते ते प्रसिद्धाः सञ्जाताः।
ऐतरेयब्राह्मणे नाभानेदिष्ठस्य छात्रजीवनस्य वर्णना विद्यते। ऐतरेयब्राह्मणस्य सम्पूर्णे नवमे खण्डे प्राचीनभारतस्य आचार्याः कथं छात्राणां सततं सत्यवादितां च शिक्षयन्ति स्म तत्य वर्णना अस्ति। तथैव तैत्तिरीयब्राह्मणे भरद्वाजस्य आख्यायिका विषये ज्ञायते। कठोपनिषदि नचिकेतसः इन्द्रियातीतज्ञानं प्रति जिज्ञासा मृत्युरहस्यभेदार्थमाकाङ्क्षायाः वर्णनं दृश्यते।

आचार्यस्य गृहकार्यं कर्तव्यत्वेन परिगण्यते स्म। छान्दोग्योपनिषदि(4-4-5) सत्यकामा कथं गुरोः गौः नित्वा गोचारणाय गतवान् तस्य विस्तृतविवरणं प्राप्यते। ऐतरेयारण्यके(3-16,3,5) शांख्यायनारण्यके च छात्राणां गोपालनस्य गोचारणस्य च वर्णनं दृश्यते। गोपथब्राह्मणे(11-2-9) ब्रह्मचर्यपालनसमये अन्तरिन्द्रिय-बहिरिन्द्रियाणां संयमः दृश्यते। छात्राणां कृते निद्रा, आलस्यं, क्रोधः, लोभः, अहङ्कारः, यशः, सौन्दर्यचर्चा, इन्द्रियपरायणतातः निवृत्तेः आदेशः आसीत् । पूर्वावस्थायां स्त्रीसङ्गः, गीतं, वाद्यं, नृत्यं, विलासिता, सुगन्धिद्रव्यव्यवहारः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

इत्यादयः मानसिक-नैतिकाध्यात्मिकोन्नतेः प्रतिबन्धकतातः सदासर्वदा दूरे स्थातुमुपदेशः प्रदीयते। आचार्यस्य सम्मुखे सदा सर्वदा विनयी निरङ्कारी च भवितव्यम्। प्रकृतेः सामान्यविषयतोपि ज्ञानाहरणं करणीयम्।

**पाठ्यविषयः**

शतपथब्रह्मणे(11-5) पाठ्यविषयस्य विस्तृतविवरणं प्राप्यते। वैदिकसाहित्ये संहिता-ब्राह्मण-आरण्यक-उपनिषत्-वेदाङ्गानि मुख्यानि। वेदापाठं स्वाध्यायः इति कथयति। शतपथब्राह्मणस्य सम्पूर्णे षष्ठे भागे वेदपाठस्य आवश्यकता प्रयोजनीयता च उपदिश्यते। शतपथब्राह्मणे वेदपाठातिरिच्यापि अन्यान्यपाठ्यविषयसम्बन्धे उल्लेखः अस्ति। ते च अनुशासनानि, विज्ञानं, वाकोवाक्यं, इतिहासपुराणानि प्रधानानि। सायणेन अस्मिन् विषये टीकायामुच्यते – अनुशासनानि अर्थे छड्वेदाङ्गानि, विद्या नाम दर्शनशास्त्राणि, वाकोवाक्यं नाम धर्मशास्त्रसम्बद्धानि, इतिहासपुराणानि अर्थे तत्त्वरहस्यं राज्ञां च कथा इति। शतपथब्राह्मणे (13-4-3) सर्पविद्या, राक्षसविद्या, असुरविद्याया उल्लेखः दृश्यते। कालक्रमे नविनविषयस्यान्तर्भावे विषयस्य वर्धनं भूरिशः जायते। छान्दोग्योपनिषदि नारदसनत्कुमारसंवादे नारदैः अधीतानां विषयाणां सूची प्राप्यते। ते च चत्वारः वेदाः, इतिहासपुराणानि, पितृसन्तुष्ट्यर्थं कार्याणि, गणितशास्त्रं, दैवविद्या, निधिविद्या, तर्कविद्या, तत्वालोचना, आचारसंहिता, ईश्वरविद्या, ब्रह्मविद्या, पदार्थविद्या, भूतविद्या, राजनीति, ज्योतिर्विद्या, सर्पविद्या, देवजनविद्या इत्यादयः। देवजनविद्या पदेन सुगन्धिद्रव्यप्रस्तुतिः, नृत्यगीतवाद्ययन्त्रसंगीतादीनां ग्रहणं क्रियते। केचन अस्यार्थः चिकित्साविद्या इत्यपि उच्यते। तथा च "ऋग्वेदं भगवोऽध्येमि यजुर्वेद९ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्य९ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्त्रविद्यां नक्षत्रविद्या९ सर्पदेवजनविद्यामेतद्भगवोऽध्येमि" इति।

वितर्कसभा –

वैदिकयुगे गुरुकुले शिक्षाप्रतिष्ठाने वा नियमितरूपेण तर्कसभायाः आलोचनासभायाः आयोजनं जायते स्म। शिक्षादानस्य अङ्गरूपेण एतेषां विषये

Since 2010
ISSN- 0976-8645
UGC RN-41039

आग्रहः तदा आसीत्। वैदिकमूलग्रन्थे एतादृशं तर्कवितर्कं "ब्रह्मोद्य" इति अभिधानेनाभिधीयते। कादम्बर्यादिप्राचीनसाहित्ये एनं विद्याविचारः विद्याविवादो वा कथयति।

शुक्लयजुर्वेदे अपि च तैत्तिरीयोपनिषदि प्रथमप्रस्तावकारीन् प्रश्निन् किञ्च प्रत्युत्तरकारीन् अभिप्रश्निन् इति नाम्ना अभिधीयते। एतादृशस्य तर्कसभातः तर्कशास्त्रस्य उत्पत्तिर्जाता स्यात्। न केवलं छात्राः अपि तु परममर्मज्ञाः आचार्याः अपि अस्यां तर्कसभायां सप्रश्रयं भागमगृह्णन्। तर्कसभायाः आयोजनं तपोवने, विद्यालये राजसभायां वा भवति स्म। शतपथब्राह्मणे बृहदारण्यकोपनिषदादिस्थानेषु अस्मिन् विषये उदाहरणं प्राप्यते। विदेहराजः जनकः विद्याचर्चायाः प्रधानपृष्ठपोषको आसीत्। शतपथब्राह्मणे देवतायाः संख्याविषये ऋषियाज्ञ्यवल्क्यशाकल्योर्मध्ये वितर्कः, उद्दालोकारूण्योर्मध्ये वितर्कः, आचार्यः शाण्डिल्यः तस्य छात्रः साप्तरथ्योः मध्ये, होताध्वर्योः मध्ये, अश्वमेधयज्ञसम्बन्धे पुरोहितयोः मध्ये तर्कवितर्कः बहुत्र परिलक्ष्यते। ऋषियाज्ञ्यवल्क्यः अन्यान् ऋषिन् तर्कयुद्धे परास्तं अकरोत्। यथैव गार्गीरपि समाना आसीत्। विजयीनां कृते बहुमूल्यपुरस्कारस्यापि व्यवस्था आसीत्।

छात्रभेदः –

छात्राः द्विविधाः आसन्। एकं उपकुर्वाणः, अपरञ्च नैष्ठिकः। उपकुर्वाणाः पाठसमाप्तेः पितृगृहं प्रत्यागमनं कृत्वा गार्हस्थ्ये प्रविशन्ति स्म। अपरं नैष्ठिकाः पुनः गृहप्रत्यागनं न कुर्वन्ति स्म। ते त्यागव्रतं स्वीकृत्य आचार्यस्य गृहे स्थित्वा चिरकौमार्यव्रतमाचरन्ति स्म। ते एव भविष्ये परमपण्डिताः ऋषयश्च भवन्ति स्म। उपकुर्वानाः गृहप्रत्यावर्तनकाले गुरुदक्षिणारूपेण गुरुन् किमपि प्रदाय प्रत्यागनं करोति स्म। किन्तु तदा शिक्षादानं विनामूल्येनैव भवति स्म। पुत्रस्य शिक्षार्थं किञ्चिदपि व्ययः गृहात् न भवति स्म। शिक्षाप्रतिष्ठानस्य समीपस्थाः ग्रामाः व्ययभारं गृह्णाति स्म। प्रतिदिनं छात्राः भिक्षान्नं संगृह्य क्षुन्निवृत्तिं करोति स्म। आचार्योऽपि किञ्चिदपि मूल्यग्रहणं न करोति स्म। आचार्यशब्दस्य अर्थ एव आचिनोति अर्थान्, मन्त्रव्याख्याकर्ता समानार्थकः मन्त्रव्याख्याकृत् आचार्यः। एवं तत्र प्रचलनमासीत् यत् आचार्यं किमपि अप्रदाय गम्यते चेत् सामान्यतमशिक्षालाभोऽपि व्यर्थो भवति। अतः गमनसमये स्वसामर्थ्यानुसारं किमपि प्रदाय गच्छति स्म।

आचार्यभेदः –

Since 2010
ISSN- 0976-8645
UGC RN-41039

उपाध्यायायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः।
मन्त्रव्याख्याकृदाचार्य आदेष्टा त्वध्वरे व्रती॥
आचार्यविषये भेदाः सन्ति। उपाध्यायः, अध्यापकः, गुरुः, आचार्यः इत्यादयः। उपनयनसमापनानन्तरं छात्राः गुरुगृहं प्रति शिक्षालाभाय गच्छन्ति। अपि च अन्येपि केचन भ्राम्यमानाः आचार्याः आसन्। ते भ्रमणं कृत्वा उत्सुकान् छात्रान् शिक्षादानं करोति स्म। तेषामभिधानं "चरक" इति। चरकः इत्यत्र चर्-धातुः यस्य अर्थः भ्राम्यमान इति। शतपथब्राह्मणे एतादृशानां भ्राम्यमाणाचार्याणां विषये उल्लेखोऽस्ति। एते आचार्याः अनेन क्रमेण शिक्षादानं कृत्वा समाजस्य अतिमहत्कार्यसम्पादनं अकुर्वन्। ते सहजलभ्याः सहजप्राप्ताः ज्ञानभाण्डाराः आसन्। एते सामान्यजनानं कृते अपि शिक्षाप्रदानं कुर्वन्ति स्म अपि च शिक्षासंक्रान्तविषये साहाय्यमपि कुर्वन्ति स्म।
ये आवासीयशिक्षाप्रतिष्ठानस्य आचार्याः दशसहस्रछात्राणां पठनपाठनस्य भारग्रहणं कुर्वन्ति ते कुलपतिः इति उपाधिना विभूषिताः भवन्ति स्म। कूलपतेः लक्षणं –
मुनीनां दशसहस्रं योऽन्नदानादिना।
अध्यापयेद्धरेद्वापि सवै कुलपतिः स्मृतः॥
कालिदासस्य अभिज्ञानशाकुन्तले ऋषिकण्वः कुलपतिः आसीत्। अर्थात् विश्वविद्यालयस्य प्रधानः कुलपतिः इति। अधुना यत् अध्यक्षः Chancellor इति कथ्यते।

आचार्यरूपे पिता –
आचार्यवत् पितुः सकाशादपि शिक्षाग्रहणस्य नियमः दृश्यते। शिक्षासमापनान्ते गृहे प्रत्यागतानां छात्राणां पूर्णशिक्षालाभार्थं पितुः सकाशाद्विद्यार्जनस्य दृष्टान्तो न विरलः। श्वेतकेतुः गुरुगृहात्प्रत्यागत्य पितुः आरुणेः सकाशात् ब्रह्मविद्यां प्राप्तवन्तः।
तदेव उच्यते - "श्वेतकेतुर्हारुणेयः पञ्चालानाᳩ समितिमेयाय तᳩ ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव इति " इति। शतपथब्राह्मणेऽपि(1.6.2.4) उच्यते – एकः ब्राह्मणः स्वपुत्रं विद्यां यागयज्ञं च पाठयेत्। वरुणः स्वपुत्रं भृगुं शिक्षादानमकरोत्। सामवेदस्य वंशब्राह्मणे शांख्यायनारण्यके च प्रदत्तानामाचार्याणां तालिका एनं विषयं प्रमाणयति।

आचार्यवर्णः –

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

आचार्याः केवलं ब्राह्मणाः एव भवेयुः इति नासीत्। क्षत्रीयाचार्यादपि विद्याग्रहणं ब्राह्मणैः क्रियते इति दृष्टान्तः भूरिशः दृश्यते। विदेहराजजनकः आसीत् एकः राजा विद्वान् आचार्यः। तेषां सविधे बहवः ब्राह्मणाः ऋषयः विद्याग्रहणमकुर्वन्। एवमेव राजा प्रावाहणः श्वेतकेतुं आरुणिञ्च अस्तम्भयत्। राजा उभयं ज्ञानप्रदानमकरोत्(श.ब्रा. 14.09.01, बृहदारण्यकोपनिषत् 6.1.1, छान्दोग्योपनिषत् – 1.8.1)। राजा अश्वपतेः विषये अपि श्रुयते नव ब्राह्मणाः तस्य शिष्यत्वं स्व्यकुर्वन्। तेषां कृते राजा वैश्वानरवैशिष्ट्यं प्रतिपादयामास।

आचार्यछात्रसम्बन्धः –

आचार्यशिष्यसम्बन्धः आसीदतीवमधुरान्तरिकतापूर्णः। शिष्याः आचार्यं पितृवत् सम्माननं कुर्वन्ति स्म। आचार्याः अपि शिष्यान् पुत्रतुल्यं मन्यन्ते स्म। शिक्षाप्रारम्भे मन्त्रोऽयं उद्घोष्यते स्म –

“ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै,
तेजस्वीनावधीतमस्तु मा विद्विषावहै॥
ॐ शान्तिः शान्तिः शान्तिः”॥ इति।

समावर्तने अभिभाषणम् –

समावर्तनस्य नियमः तैत्तरीयोपनिषदि एकादशानुवाके उच्यते - “वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि ॥ २ ॥

नो इतराणि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः । तेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ३ ॥

ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥ ४ ॥ " इति।

अस्मात् ज्ञायते तत्कालिनवैदिक-ऋषिणां ज्ञानं, अभिज्ञता, दूरदृष्टिताश्च। विश्वविद्यालयात् शिक्षासमापनानन्तरं गृहप्रत्यागमनकाले तेषां प्रति यानुपदेशान् प्रदत्तवन्तः तान् उपदेशान् आधुनिकच्छात्रा अपि स्वजीवनि स्थापयितुं शक्यते। येन वर्तमानकालिकी छात्राणां या समस्या तासां समाधानं अनेन कर्तुं शक्यते। न केवलं छात्राणां समाजस्यापि याः समस्याः सामाजिकावक्षयः क्रमशः वर्धमानाः दृश्यन्ते तासां समाधानमपि स्वजीवनि उपदेशस्य परिपालनेन कर्तुं शक्यते।

उपसंहारः –

स्वामीविवेकानन्दानां मते शिक्षा नाम - "Education is the manifestation of perfection already in men". वैदिकयुगे शिक्षापद्धतिः छात्राणां शारीरिकं नैतिकं मानसिकमाध्यात्मिकं विकाससाधने सम्पूर्णोपयोगी आसीत्। शिक्षाव्यवस्था मानसिकाध्यात्मिकिविकाशे सम्पूर्णोपयोगी भवति स्म। चतुराश्रमेषु प्रथमं ब्रह्मचर्यमेव सामाजिकमूल्यबोधस्य मूलभूतम्। ब्रह्मचर्यस्य अर्थः मानसिकतपः, वाचिकतपः, कायिकतपः इति। नगराद्बहिः शान्तपरिवेशे आचार्याणां तत्त्वावधाने छात्राणां ज्ञानचर्चा, शरीरचर्चा, मानसिकचर्चा च सम्यकरूपेण भवति स्म। तदा सर्वतोमुखीशिक्षाव्यवस्था छात्राणां चरित्रं पूर्णतया विकाशलाभः करोति स्म। एवं कठोरात्मसंयमेन सेवया अत्मनिर्भरतया ज्ञानचर्चया च छात्रजीवनं अतिवाहितं कृत्वा सरलजीवनं, उच्चाध्यात्मिकचिन्तया सदा परिपूर्णा व्यक्तयः इन्द्रियपरायणविषयवासनासंसारे कदापि पूर्णनिमग्नाः न भवन्ति स्म। एवमेव छात्राः संयम-सतता-त्याग-सेवाभ्यः समाजे श्रेष्ठव्यक्तिरूपेण आत्मानमभिव्यञ्जयति स्म। एते एव समाजस्य रत्नस्वरूपाः।

Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची


- (सङ्कलित), श. प. (2007). सांख्यकारिका. कोलकाता: पश्चिमवङ्ग राच्य पुस्तकपर्षत्.
- (2011). ईशादि नौ उपनिषद्. गोरखपुर: गीताप्रेस.
- (2013). छान्दोग्योपनिषत्. गोरखपुर: गीताप्रेस.
- (2011). बृहदारण्यकोपनिषत्. गोरखपुर: गीताप्रेस.
- भट्टः, अ. (2001). तर्कसंग्रहः. वाराणसी: चौखम्बसंस्कृत सीरीज.
- भट्टाचार्यः, श. श. (1973). भामती. कोलकाता: संस्कृतपुस्तकभाण्डार.
- वसु, य. (1957). वेदेर परिचय. कोलकाता: के. एल. मुखोपाध्याय.
- शङ्कराचार्यः. (2002). तैत्तिरीयोपनिषद्भाष्यम्. गोरखपुर: गीताप्रेस.
- शतपथब्राह्मणम्. (1989). बरानसी: चौखम्बा सुरभारती प्रकाशनी.
- सायणाचार्यः. (2002). ऋग्वेदसंहिताभाष्यम्. वाराणसी: चौखम्बासंस्कृतसंस्थानम्.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# संस्कृत एवं स्वास्थ्य विज्ञान

Chandrika H.G.[2] "Dr Aravind C Shanbhag[3]

**मुख्य शब्द :** आयुर्वेद शिक्षा, ज्ञान, मनोवृत्ति, अभ्यास अध्ययन, संस्कृत

**शोधसारः-** आयुर्वेदक्षेत्रे शिक्षणं केन्द्रीय-भारतीयचिकित्सापरिषद् (CCIM) द्वारा नियन्त्रितम् अस्ति । प्रथमे आयुर्वेदिकचिकित्सा शल्यक्रियास्नातकपाठ्यक्रमे (BAMS) संस्कृतविषयस्य भारः 2012 तमे वर्षे CCIM अधिसूचनाद्वारा 250 अङ्कात् 100 अङ्कान् यावत् न्यूनीकृतः अस्ति।संस्कृतविषयस्य अङ्कानां भारस्य न्यूनता 250 अंकात् 100 अंकपर्यन्तं न्यूनीकृत्य ज्ञानं प्रभावितं कर्तुं शक्नोति संस्कृत विषयस्य ।

**परिचयः**"-आयुर्वेदः" स्वास्थ्यसेवायाः प्राचीनतमदस्तावेजितप्रणालीषु अन्यतमः अस्ति यः स्वस्थजीवनस्य उपायानां विषये विस्तृतरूपेण व्यवहारं करोति । आयुर्वेदक्षेत्रे शिक्षायाः नियमनं केन्द्रीयचिकित्सापरिषद् (CCIM) इत्यनेन भवति, यत् संसदस्य अधिनियमेन अस्तित्वं प्राप्तम् ।[१] १९७१ तमे वर्षात् सीसीआईएम-संस्थायाः निर्माणानन्तरं आयुर्वेदिकपाठ्यक्रमः स्थानीयभाषासु पाठ्यमानः आसीत् । आयुर्वेदिकचिकित्सा शल्यक्रियास्नातक (BAMS) इत्यस्य प्रवेशमापदण्डः पाठ्यक्रमः उच्चतर माध्यमिकप्रमाणपत्रस्य (HSC) परीक्षा तथा भौतिकशास्त्र, रसायनशास्त्र तथा जीवविज्ञान विषयेषु सामान्यप्रवेशपरीक्षा अस्ति। भारतस्य अल्पेषु राज्येषु संस्कृतस्य पूर्वज्ञानस्य आवश्यकता नास्ति ।

**आयुर्वेदस्य मूलसाहित्यं अर्थात् संहिता प्राचीनभारतस्य भाषायां संस्कृतभाषायां लिखितम् अस्ति ।** एताः संहिताः आयुर्वेदशिक्षायाः अभिन्नः भागाः सन्ति । अतः आयुर्वेदशिक्षणाय संस्कृतभाषायाः ज्ञानम् आवश्यकं भवति । पूर्वं बीएएमएसस्य प्रथमवर्षे २५० अंकैः अर्थात् २०० अंकैः सिद्धान्तः (प्रत्येकं १०० अंकाः २ सिद्धान्तपत्राणि) ५० अंकैः च विवा-वोस् इति प्रमुखविषयेषु

[2] Research Scholar, Srinivas Yoga Sanskrit Research Centre, Mangaluru
[3] Research Professor, Srinivas Yoga Sanskrit Research Centre, Mangaluru

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

अन्यतमम् आसीत् ।[२] संस्कृतभाषायाः अध्यापनस्य उद्देश्यं छात्रः संस्कृतभाषायां लिखितानां प्राचीनानां आयुर्वेदग्रन्थानां पठने अवगन्तुं च समर्थः भवेत्। २०१२ तमस्य वर्षस्य मार्चमासात् (CCIM Notification) प्रथमवर्षस्य BAMS मध्ये केवलं संस्कृतस्य १०० अंकस्य (१ सिद्धान्तपत्रम्) एव पत्रम् अस्ति ।[३] अस्य विषयस्य सम्प्रति विव-वाणी नास्ति।

अनेकानाम् आयुर्वेदवैद्यानां मते आयुर्वेदस्य कृते संस्कृतस्य सुविज्ञं ज्ञानं, सम्यक् अवगमनं च अत्यावश्यकम् अस्ति । संस्कृतस्य शिक्षणं तादृशं भवेत् यत् छात्रः मौलिकग्रन्थपठने समर्थः भवितुमर्हति।[4] आयुर्वेदस्य शिक्षणप्रक्रियायां गुणात्मकसुधाराय संस्कृतं विषयरूपेण अनेके प्रख्याताः आयुर्वेदवैद्याः आवश्यकं मन्यन्ते । एतत् एकघण्टायाः आवश्यकता अभवत् यत् BAMS परीक्षायां सफलतां प्राप्तुं संस्कृतभाषायाः ज्ञानं आवश्यकं वा इति। विद्यालयस्तरस्य संस्कृतं शिक्षमाणानां छात्राणां संस्कृतभाषायाः पूर्वपरिपर्ककारणात् BAMS परीक्षायां सफलतां प्राप्तुं सुकरं भवति वा इति अपि द्रष्टव्यम् ।

BAMS पाठ्यक्रमे प्रवेशं गृह्णन्ति बहवः छात्राः संस्कृतस्य सम्पर्कं न प्राप्नुवन्ति। 1st year BAMS इत्यस्मिन् संस्कृतविषयस्य वर्तमानपाठ्यक्रमस्य पर्याप्ततां द्रष्टुम् अपि आवश्यकं यत् छात्राः समुचितबोधेन मौलिक आयुर्वेदग्रन्थान् पठितुं समर्थाः भवेयुः। संस्कृतविषयस्य अङ्कानां भारस्य २५० अङ्कात् १०० अङ्कपर्यन्तं न्यूनता संस्कृतविषयस्य ज्ञानं प्रभावितं कर्तुं शक्नोति।

उपरिष्टात् तथ्यं मनसि कृत्वा ज्ञान, मनोवृत्ति, अभ्यास (KAP) सर्वेक्षणरूपेण अवलोकनात्मकस्य अध्ययनस्य योजना मुम्बईनगरस्य तथा मुम्बई-नगरस्य समीपस्थेषु विभिन्नेषु आयुर्वेदिकमहाविद्यालयेषु छात्राणां नामाङ्कनं कृत्वा कृता आसीत् संस्कृतविषयस्य ज्ञानं, छात्राणां मनोवृत्तिः, व्यवहारः च मूल्याङ्कनार्थम् अयं अध्ययनः कृतः। संस्कृतविषयस्य विषये संस्कृतभाषाज्ञानस्य बीएएमएस परीक्षायाः परिणामस्य च कारणसम्बन्धं दर्शयितुं च।

आयुर्वेदः मूलतः विज्ञानम् अस्ति, यत् जीवनदर्शनस्य विषये वर्तते । आयुर्वेदिकचिकित्साव्यवस्था खलु स्वास्थ्यसेवायाः प्राचीनतमः व्यवस्था अस्ति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

आयुर्वेदशिक्षायाः गुणवत्ता चिरकालात् चिन्ताजनकः विषयः अस्ति, अनेकविधाः आलोचनाः अपि आकर्षिताः सन्ति । आयुर्वेदशिक्षाक्षेत्रे विविधाध्ययनद्वारा एतत् बोधितं यत् आयुर्वेदस्य वर्तमानपाठ्यक्रमे महत्त्वपूर्णसुधाराः आवश्यकाः सन्ति।

सर्वाणि मूलप्राचीनानि आयुर्वेदग्रन्थानि संस्कृतभाषायां लिखितानि सन्ति । आयुर्वेदिक-अध्ययनेषु संस्कृतस्य ज्ञानस्य आवश्यकता वर्तमान-अध्ययन-माध्यमेन मूल्याङ्किता अस्ति । प्रस्तुताध्ययनं संस्कृतस्य वर्तमानपाठ्यक्रमस्य पर्याप्तता द्रष्टुं प्रयत्नः आसीत् येन छात्राः मूल आयुर्वेदग्रन्थानां पठने, सम्यक् अवगमने च प्रवीणाः भवेयुः। विद्यालयस्तरस्य संस्कृतस्य पूर्वसंपर्कस्य भूमिका अपि अस्य अध्ययनस्य माध्यमेन मूल्याङ्किता।

अयं अवलोकनात्मकः अध्ययनः केएपी सर्वेक्षणस्य माध्यमेन कृतः यत् आयुर्वेदिक-संस्कृत-अध्ययनयोः कृते प्रयतितम् आसीत् । केएपी सर्वेक्षणे जनसंख्यानां ज्ञानस्य, मनोवृत्तेः, विशिष्टविषयेण सह सम्बद्धानां व्यवहारानां च निश्चितस्तरस्य मूल्याङ्कनं भवति । केएपी सर्वेक्षणं विविधकारणात् कार्यान्वितुं शक्यते। निदानसाधनरूपेण, विकासरूपेण मूल्याङ्कनसाधनरूपेण वा उपयोगी भवितुम् अर्हति ।[७] केएपी अध्ययनस्य वास्तविकं उद्देश्यं विषयान् अवगन्तुं छात्राणां कष्टानि ज्ञातुं आसीत् मुख्यतया प्रश्नावलीयाः मनोवृत्तिखण्डस्य माध्यमेन।

केएपी-अङ्कानां औसत-बीएएमएस-अङ्कानां च मध्ये मध्यम-सकारात्मक-सहसंबन्धः द्वयोः समूहयोः दृश्यते स्म । संस्कृतविषयाणां ज्ञानं छात्राणां BAMS विश्वविद्यालयपरीक्षासु सफलतां प्राप्तुं सुगमं करोति।

द्वयोः समूहयोः केएपी-अङ्कानां मध्ये सांख्यिकीयदृष्ट्या महत्त्वपूर्णः अन्तरः नासीत् । प्रथमवर्षे बीएएमएस-मध्ये संस्कृतविषयस्य भारस्य न्यूनतायाः अभावेऽपि केएपी-अङ्कस्य, बीएएमएस-परीक्षायां अङ्कानां च विषये उभयसमूहेषु कोऽपि अन्तरः (सांख्यिकीयदृष्ट्या महत्त्वपूर्णः) न प्राप्तः एतत् दर्शयति यत् संस्कृतं यत् प्रथमवर्षे BAMS स्तरे पाठ्यते तत् छात्राणां ज्ञाने कोऽपि अन्तरं न करोति। विद्यालयस्तरस्य छात्राणां संस्कृतविषयस्य पूर्वसंपर्कः छात्राणां BAMS परीक्षायां उत्तमं अंकं प्राप्तुं सुगमं करोति

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

सांख्यिकीयदृष्ट्या महत्त्वपूर्णः नासीत् BAMS पाठ्यक्रमे प्रवेशं गृह्णन्तः, ये छात्राः अधीतवन्तः, ये विद्यालयस्तरस्य संस्कृतं न अधीतवन्तः, तेषां संख्यायां सांख्यिकीयदृष्ट्या महत्त्वपूर्णः अन्तरः आसीत् ये छात्राः विद्यालयस्तरस्य संस्कृतं न अधीतवन्तः तेषां संख्या अधिका भवति। संस्कृतस्य पूर्वज्ञानं BAMS पाठ्यक्रमे प्रवेशस्य मानदण्डः नास्ति। एतेषु द्वयोः समूहयोः केएपी-अङ्के तथा औसत-बीएएमएस-अङ्केषु सांख्यिकीयदृष्ट्या महत्त्वपूर्णः अन्तरः प्राप्तः । येषां छात्राणां स्तु नास्ति ये छात्राः विद्यालयस्तरस्य संस्कृतं न अधीतवन्तः तेषां छात्राः सामान्यतया विद्यालयस्तरस्य संस्कृतस्य सम्पर्कं प्राप्तानां छात्राणां तुलने BAMS परीक्षासु सफलतां प्राप्तुं कष्टं अनुभवन्ति।

ये छात्राः विद्यालयस्तरस्य संस्कृतम् अधीतवन्तः तेषां संस्कृतव्याकरणस्य मूलभूतं ज्ञानं यथा सन्धी, करक/विभक्तिः, सामसः, शब्दधातुरूपावली, प्रत्यायः, उपसर्गः च, परन्तु ते पाणिनी सूत्रस्य सम्पर्कं न कृतवन्तः यस्मात् व्याकरणस्य नियमाः उत्पन्नाः. एते छात्राः अमरकोशात् निबन्ध, लघुकथा, काव्य, सुभाषिता, पर्यायवाची इति रूपेण संस्कृतशब्दकोशस्य अपि सम्पर्कं कृतवन्तः । एते छात्राः संस्कृतश्लोकान् सम्यक् पठितुं, उच्चारयितुं, लिखितुं च शक्नुवन्ति स्म तथा च. किञ्चित्पर्यन्तं (दशमश्रेणीसंस्कृतपर्यन्तं) श्लोकान् अवगन्तुं शक्नोति स्म।

विद्यालयस्तरस्य तेषां स्कोरः न अभिलेखितः, यतः सः वर्तमानस्य अध्ययनस्य व्याप्तेः परः आसीत् । विद्यालयस्तरस्य स्कोरं न कृत्वा पूर्वं संस्कृतस्य सम्पर्कः केवलं विचार्यते स्म । विद्यालयस्तरस्य (तेषां परीक्षायां सद्यः उत्तीर्णाः अपि) तेषां स्कोरं न कृत्वा संस्कृतभाषायाः मूलभूतज्ञानं भाषायाः अग्रे स्तरं यावत् अध्ययनं कर्तुं सहायकं भविष्यति।

एतत् दर्शयति यत् विद्यालयस्तरस्य संस्कृतं यत् पाठ्यते तत् छात्राणां आयुर्वेदग्रन्थानां पठने, अवगमने, पाठे च सुगमं करोति। अपि च संस्कृतस्य पूर्वं सम्पर्कस्य अभावात् एषा भाषा आयुर्वेदस्य अवगमनाय अनेकेषां छात्राणां कृते प्रभावी साधनं न तु बाधकं प्रस्तुतं करोति ।आयुर्वेदस्य शिक्षणप्रक्रियायां गुणात्मकसुधाराय संस्कृतं विषयत्वेन आवश्यकम् । एतेन यूजी तथा पीजी स्तरस्य छात्राणां सामान्यसमझौ (आयुर्वेदस्य) सुधारः भविष्यति तथा च अन्ततः

Since 2010
ISSN- 0976-8645
UGC RN-41039

आयुर्वेदस्य स्थापना सुदृढा, सुरक्षिता, आर्थिकस्वास्थ्य-सेवा-व्यवस्थारूपेण भविष्यति। स्वास्थ्यं कस्यचित् जीवनस्य बृहत्तमं धनम् अस्ति। येन जीवने अन्ये सर्वे कार्याणि साधयितुं शक्यन्ते।

आयुर्वेदात् रसायनशास्त्रस्य विकासः अभवत् । प्राचीनभारते कच्चालोहस्य रासायनिक-उत्कृष्टता बहुधा स्वीकृता अस्ति । भारतं साम्राज्य-रोम-देशेन अपि रञ्जन-चर्म-निर्माण-साबुन-निर्माण-काच-सीमेण्ट्-आदिषु रसायन-उद्योगेषु राष्ट्रेषु सर्वाधिक-कुशलः इति दृष्टः आसीत् संस्कृतसाहित्ये कल्कीकरण, आसवन, उदात्तीकरण, वाष्पीकरण, निश्चयः, तापरहितप्रकाशस्य उत्पादनं, संज्ञाहरण-सोपोरिफिक-चूर्णानां मिश्रणं, धातुलवण-संयुत-मिश्रधातु-निर्माणं च भारतीयानां निपुणता दृश्यते राजा पोरसः अलेक्जेण्डरस्य कृते विशेषमूल्यं उपहाररूपेण सुवर्णरजतयोः अपेक्षया ३० पौण्ड् इस्पातस्य चयनं कृतवान् इति कथ्यते।

आयुर्वेदिकसाहित्ये शरीररचनाशास्त्रस्य शरीरविज्ञानस्य च वर्णनं भवति तथा च स्नायुबन्धाः, सिवनी, लसिका, तंत्रिकाजालः, फास्सिया, वसा तथा..नाडी ऊतकाः, तथा च आधुनिकशवः यत् किमपि दर्शयितुं समर्थः अस्ति तस्मात् अधिकानि मांसपेशिनि। अत्रेयः (५०० ईपू) मातापितृबीजं स्वयमेव, लघुरूपेण, सम्पूर्णं मातापितृजीवं समाविष्टं भवति इति मतं निर्वाहयितुम् वेस्मैन् इत्यस्य २४०० वर्षाणि यावत् पूर्वानुमानं कृतवान् आयुर्वेदिकसाहित्ये अपि भ्रूणस्य विकासस्य वर्णनं पर्याप्तसटीकतया कृतम् अस्ति। अद्यत्वे अपि भारते आयुर्वेदस्य अभ्यासः अतीव व्यापकः अस्ति, तस्य प्रभावशीलता विश्वस्य विभिन्नेषु भागेषु अपि अधिकाधिकं स्वीकृता इति विलक्षणम् । सुश्रुतेः सम्पूर्णं निदानचिकित्साव्यवस्थां संस्कृतेन लिखितवान्, अपि च मोतियाबिन्दुः, हर्निया, शिलाच्छेदनम् इत्यादयः अनेकाः शल्यक्रियाः अपि वर्णिताः । सः लान्सेट्, ध्वनिः, संदंशः, कैथेटरः, गुदा-योनि-स्पेकुलम् इत्यादीनां १२१ शल्ययन्त्राणां उल्लेखं करोति। सः एव प्रथमः शरीरस्य अन्यभागात् गृहीतस्य त्वचायाः विदीर्णकर्णभागस्य उपरि ग्राफ्टं कृतवान्, एतादृशस्य शल्यक्रियायाः अध्ययनं प्रसारणं च एतावत् व्यापकं कृतम् यत् भारते ब्रिटिशसेनायाः एकस्य सैनिकस्य प्रमाणं अस्माकं समीपे अस्ति यस्य चिकित्सा कृता स्थानीयेन तथाकथितेन अयोग्यशल्यचिकित्सकेन एतादृशेन

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

शल्यक्रियाद्वारा(एतत् उदाहरणं बहुकालपूर्वं लण्डन्नगरस्य वेलकम् इन्स्टिट्यूट् फ़ॉर् द हिस्ट्री आफ् मेडिसिन् इत्यनेन आयोजितायां प्रदर्शन्यां प्रत्ययप्रदसाक्ष्यैः सह उद्धृतम् आसीत्)।

work इति शरीररचनाशास्त्रस्य, शरीरविज्ञानस्य, चिकित्साशास्त्रस्य च विषये विस्तृतः ग्रन्थः अस्ति, तत्र हार्वे इत्यस्मात् पूर्वं शतवर्षपूर्वं रक्तस्य परिसञ्चरणस्य उल्लेखः कृतः, तस्य नवीनरोगस्य उपदंशस्य च पारा विहितः यः तस्मिन् समये पुर्तगालीभिः भारते आनीतः आसीत् इदमपि उल्लेखनीयं यत् १८ शताब्द्याः पूर्वं यूरोपदेशे अज्ञातं टीकाकरणं भारते ५५० ई. सौभाग्येन एतत् अधिकाधिकं स्वीकृतं भवति यत् मध्ययुगीनः आधुनिकः च यूरोपः स्वस्य चिकित्साव्यवस्थायाः ऋणी प्रत्यक्षतया अरब-जनानाम् अस्ति तथा च तेषां माध्यमेन भारतस्य ऋणी अस्ति..

**"पुनर्वित्तं पुनर्मित्रं पुनर्भार्या पुनर्मही।**
**एतत्सर्वं पुनर्लभ्यं न शरीरं पुनः पुनः।।"**

जीवने सर्वं पुनः प्राप्तुं शक्यते- पत्नी, राज्यं, मित्रं, धनं च। केवलं तव शरीरं यत् त्वं कदापि पुनः प्राप्तुं न शक्नोषि । एकदा भवतः शरीरं / स्वास्थ्यं नष्टं जातं चेत् पुनः कदापि स्वस्य पूर्णतां प्राप्तुं न शक्नोति। अतः नित्यं शरीरस्य परिचर्या करणीयम्

मधुमेहस्य दीर्घकालीनजटिलतासु हृदयघातः, तंत्रिकाक्षतिः, मस्तिष्कक्षतिः, अन्धता, मृत्युः अपि सन्ति । अतः भवन्तः स्वशर्करायाः स्तरस्य नियमितरूपेण अवलोकनं कुर्वन्तु तथा च आपत्काले तत्क्षणमेव स्वचिकित्सकेन वा स्वास्थ्यप्रशिक्षकेन वा सम्पर्कं कुर्वन्तु।

Since 2010
ISSN- 0976-8645
UGC RN-41039



धनुर्वेदः अतीव प्राचीनः विज्ञानः इव दृश्यते, यत्र युद्धशस्त्रस्य विज्ञानं, निर्माणं च युद्धविज्ञानं च विषयः अस्ति। रामायणे महाभारते च एतेषु विज्ञानकलासु सुप्रकाशः क्षिप्यते। धनुर्वेदस्य महत्त्वपूर्णाः प्राचीनग्रन्थाः न उपलभ्यन्ते किन्तु केचन ज्ञाताः ग्रन्थाः सन्ति धनुर्विधिः, द्रोणविद्या, कोडण्डमण्डनः, धनुर्वेदसंहिता च।

गन्धर्ववेदः सङ्गीतविज्ञानम्, सामवेदात् उत्पन्नं च अस्माभिः एतस्य विषयस्य संक्षेपेण पूर्वमेव निरूपणं कृतम्, छन्दस्य वेदङ्गस्य निबन्धनं कुर्वन्।

**निगमन**

ये छात्राः विद्यालयस्तरस्य संस्कृतम् अधीतवन्तः तेषां कृते BAMS परीक्षायां विशेषतया च संस्कृतविषये उत्तमाः अंकाः प्राप्तुं सुकराः भवन्ति। विद्यालयस्तरस्य संस्कृतभाषायाः पूर्वसंपर्कस्य कारणात् छात्राणां संस्कृतस्य सुज्ञानं भवति, तस्य प्रति सकारात्मकदृष्टिकोणः भवति, तस्य अभ्यासमपि भवति। बीएएमएस-पाठ्यक्रमे प्रवेशात् पूर्वं ये छात्राः संस्कृतभाषां शिक्षितवन्तः तेषां व्याकरणस्य शब्दावलीयाः च दृष्ट्या संस्कृतस्य मूलभूतं ज्ञानम् आसीत्।

उभयसमूहेषु पाठ्यक्रमः किञ्चित् समानः आसीत्। पूर्वपाठ्यक्रमे आयुर्वेदीयहितोपदेशः इति पाठः आसीत्, तस्य स्थाने सुश्रुतसंहिताशरीरास्थानम्,

Since 2010
ISSN- 0976-8645
UGC RN-41039

चतुर्थः अध्यायः आसीत् । संस्कृतविषयस्य अङ्कवितरणं द्वयोः प्रारूपयोः विषमम् आसीत् ।

संस्कृतविषयस्य विवा-स्वरः नास्ति इति कारणतः छात्राणां विषयस्य पाठ-अवगमन-क्षमतायाः मूल्याङ्कनं दुष्करं करोति । संस्कृतं यत् BAMS व्यावसायिकपाठ्यक्रमस्तरस्य प्रथमवर्षे पाठ्यते तत् छात्राणां ज्ञाने कोऽपि अन्तरं न करोति। संस्कृतविषयस्य विद्यमानः अथवा पूर्वपाठ्यक्रमः विषयस्य अवगमने अपि च सर्वेषां विषयाणां विश्वविद्यालयपरीक्षायां औसतप्राप्ताङ्केषु किमपि भेदं न जनयति। अतः ये छात्राः विद्यालयस्तरस्य संस्कृतस्य सम्पर्कं न प्राप्नुवन्ति, तेषां कृते संस्कृतभाषायां लघुसेतुपाठ्यक्रमस्य आरम्भस्य आवश्यकता वर्तते, ये च BAMS पाठ्यक्रमे प्रवेशं गृहीतवन्तः आसन्।

तथैव अध्ययनं बृहत् नमूना आकारेण, अध्ययनस्य दीर्घकालं यावत् व्यापकं भौगोलिकक्षेत्रं च कृत्वा, अर्थात् दीर्घकालीनशिक्षणपरिणामानां आकलनाय सम्पूर्णे भारते विभिन्नानां आयुर्वेदिकमहाविद्यालयानाम् छात्राणां समावेशः कृत्वा कर्तुं शक्यते।

दीर्घायुषः पोषणस्य, रक्षणस्य, निर्वाहस्य च कलाविज्ञानम्। आयुर्वेदस्य प्रवर्तकः धनवानात्रिः इति कल्पितः आसीत् । तदतिरिक्तं आत्रेयः, काश्यपः, हरिता, अग्निवेशः, भेदमुनिः च अन्ये प्रमुखाः । सम्प्रति आयुर्वेदस्य चरकसंहिता, शुश्रुतसंहिता, वाग्भट्टसंहिता इति त्रयः महत्त्वपूर्णाः ग्रन्थाः सम्यक् अध्ययनं कुर्वन्ति । एतानि त्रीणि पुस्तकानि सामूहिकरूपेण बृहत् त्रै इति उच्यन्ते ।

**“भोजनाग्रे सदा पथ्यं लवणाद्रकभक्षणम्।**
**अग्निसन्दीपनम् रूच्यं जिह्वाकण्ठविशोधनं।।”**
किमपि भोजनं आरभ्यतुं पूर्वं शिलालवणचूर्णेन सह नवीनं अदरकं खादितव्यम् । पाचनशक्तिं वर्धयितुं, कण्ठं जिह्वां च स्वच्छं कर्तुं, रसगुल्मान् अपि सक्रियं कर्तुं च साहाय्यं करिष्यति ।
मधुमेहप्रबन्धनस्य एकः अत्यावश्यकः भागः भवतः किं खादति इति निरीक्षणम् अस्ति । भवन्तः एतादृशं आहारं सेवन्तु यस्मिन् तन्तुयुक्तं न्यूनं कार्बोहाइड्रेट् च भवति

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

। शर्करायुक्तानि, तप्तानि च आहारपदार्थानि परिहरन्तु, सोडायुक्तानि, उच्चशर्करायुक्तानि पेयानि अपि परिहरन्तु । भवन्तः इन्फ्यूज्ड् जलं, ओषधीयचायम् इत्यादीनां विकल्पं कर्तुं शक्नुवन्ति ।

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।। Gita-2.48**

नित्यकर्मनिर्वहणे भवन्तः निष्कपटाः भवेयुः। सफलताविफलतायोः सङ्गं त्यक्तव्यम् । एतादृशं सन्तुलनं योगद्वारा प्राप्तुं शक्यते।

योगस्य मधुमेहस्य च जटिलसम्बन्धः अस्ति । मधुमेहरोगस्य उन्नयनार्थं योगः सहायकः भवितुम् अर्हति इति सिद्धम् अस्ति । कतिपयैः ध्यानव्यायामैः सह, एतत् व्यक्तिस्य तनावस्तरं न्यूनीकर्तुं साहाय्यं कर्तुं शक्नोति यत् क्रमेण तेषां शर्करास्तरस्य उपरि सकारात्मकं प्रभावं कर्तुं शक्नोति ।



**ॐ सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्।**

सर्वे भाविनः शान्तिं भवन्तु, मा कश्चित् व्याधिना पीडितः भवतु, सर्वे पश्यन्तु शुभं, मा कश्चित् दुःखं प्राप्नुयात्। ॐ शान्ति, शान्ति, शान्ति।

## Bibliography

1. Chandola H. Reinvent the system of education in ayurveda. *AYU.* 2012;33:459–60.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

2. CCIM Notification in the Gazette of India, New Delhi. 2005. [accessed on 15-03-2016].
3. New Delhi: [Last accessed on 2012 Apr 26]. CCIM Notification in the Gazette of India, Extraordinary, Part III. Sec. 4.
4. Deopujari J, Sharma M. 1st ed. Nagpur: Ayurved Vyasapeeth; 2013. Ayurvedic Education: Perspective and Implications
5. Mahajan B. New Delhi: JP Brothers Medical Publications; 2006. Correlation and Regression, Methods in Biostatistics
6. Patwardhan K, Gehlot S, Singh G, Rathore HC. The ayurveda education in India:
7. Kaliyaperumal K. Guideline for conducting a knowledge, attitude and practice (KAP) study. *Community Ophthalmol.* ]
8. Gadgil VD. Understanding ayurveda. *J Ayurveda Integr Med.* 2010;1:77–80.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# आयुर्वेदस्य वैश्विकं चिन्तनं

डा.सुनीलः के एस् [4]

**मुख्य शब्द :** शरीरम्, इन्द्रियाणि, मनः, आत्मा

**शोधसार:**

अस्माकं शरीरं पाञ्चभौतिकम्। यावत् आत्मा एतस्मिन् शरीरे तिष्ठति तावत् पुरुषो जीवतीति व्यवहारः। तस्मात् पुरुषस्य जीवितं यावति काले भवति स काल आयुः इत्युच्यते, तददुक्तं चरकेण शरीरेन्द्रियसत्त्वात्मसंयोगः आयुः ॥ सत्त्वं चात्र मनः। शरीरम् इन्द्रियाणि मनः आत्मा चेति एतेषां संयोगः यावति काले भवतिय काल आयुः इति अस्यार्थः। तत्सम्बन्धि शास्त्रम् आयुर्वेद इत्युच्यते। आयुः विद्यते अस्मिन्निति, आयुर्विन्दत्यनेनेति वा आयुर्वेद इति शब्दस्य निर्वचनम्। यत्र आयुःसम्बन्धी विषयो प्रतिपादितो वर्तते अथवा येन मानवा आयुः विन्दन्ति स आयुर्वेद इति अस्यार्थः। अयं चायुर्वेदः अथर्ववेदस्य अङ्गम्।

तत्रभवन्तो भवन्तोऽनुभवन्त्येवाहर्निशं यदस्माकं संस्कृतवाङ्मयमतीव विशालम्। अत्र मानवानामुपकाराय परमकारुणिको भगवान् वेदवेदाङ्गेतिहासपुराण-धर्मशास्वार्थ-शास्त्रादिभिः सहैवायुर्वेदशास्त्रमपि प्रणीतवान्। तद्यथा-

**सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यॅल्लुक्-श्रम्-शेष्विदं क्रमात् ॥**

इत्यनेकार्थकाद् विद्धातोर्घञ्प्रत्ययेन वेदशब्दो निष्पद्यते, इण् गतौ इत्यस्माद् धातोश्च 'एतेर्णिच्च (२/११९)' इत्युणादिसूत्रेण उसि प्रत्यये आयुष् शब्दः। आयुषो वेदः आयुर्वेदः, आयुर्वेद एवायुर्विज्ञानम्। अथर्ववेदस्योपवेदरूपेणायुर्वेदस्य विकासोऽभूत्। उक्तञ्च- 'आयुर्वेदं नामोपाङ्गमथर्ववेदस्य। इदं शास्त्रं न केवलं

[4] संस्कृत विभागाध्यक्षः, जैन महाविद्यालयः, विश्वेश्वरपुरम्

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

व्याध्युपसृष्टानां निवारकमपितु, स्वास्थ्यपरिरक्षकमपि। तथाहि व्याध्युपसृष्टानां व्याधिपरिमोक्षः। स्वस्थस्य स्वास्थ्यरक्षणम्। किञ्च, आयुर्जीवनस्यैवापरपर्यायोऽस्ति । उक्तश्च काश्यपेन- आयुर्जीवितमुच्यते' इति । उक्तञ्च चरकसंहितायाम्-

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।**
**मानश्च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥**

एवं मानवस्य कायिकवाचिकमानसिकानां त्रिविधतापानां, व्यष्टेः समष्टेर्वा रोगारोगस्याधिव्याधेर्विचारकमायुर्वेदशास्त्रं व्यापकमस्ति, बुद्धेर्मलापहारकमध्यात्ममपि
अत्रोपवर्णितम्। तथाहि- "बुद्धया विषयविज्ञानं विषमं च प्रवर्तनम्। प्रज्ञापराधं जानीयात्" इति।। यच्चायुर्वेदोक्तमध्यात्ममनुध्यायति वेदयत्यनुविधीयते सोऽस्य परो धर्मः।
किञ्चायुर्वेदोपदेशेऽध्यात्मविद्याऽपि समादिष्टा।
अत एवायुर्वेदः 'उभयलोकहितकरः' इत्युच्यते ।

तथा चोक्तम्-

**तस्यायुषः पुण्यतमो वेदो वेदविदां मतः।**
**वक्ष्यते यन्मनुष्याणां लोकयोरुभयोर्हितः ।।**

कायिकवाचिकमानसिकानां विकाराणां ' दोष' इत्यपरं नाम। दोषा एव मलाः। मला एवायुर्वेदे रोगशब्देनोक्ताः। तथा चोक्तं शाङ्गधरसंहितायाम् - 'मलिनीकरणान्मलाः।' एते एव वातपित्तकफादीनां विकृतयः। दोषा अपि रोगशब्दं लभन्ते इत्युक्तं चरके। भर्तृहरिरप्याह मलानां त्रैविध्यं वाक्यपदीये-

**कायवाग्बुद्धिविषया ये मलाः समुपस्थिताः।**
**चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ।।**

Since 2010
ISSN- 0976-8645
UGC RN-41039

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन' इति अन्यत्राप्युक्तम्। चिकित्साशास्त्रं केवलं वैद्यकमात्रपरमायुर्विज्ञानस्याङ्गभूतम्। तथा चोक्तममरकोषे "चिकित्सा रुक्प्रतिक्रिया इति,
" आयुर्जीवनकालो ना जीवातुर्जीवनौषधम्" इत्यमरः। २/८/१२०।

कायचिकित्सा नाम सर्वाङ्गसंश्रितानां व्याधीनां ज्वररक्तपीतशोषोन्मादापस्मार-कुष्ठमेहातिसारादीनामुपशमनार्थमित्युक्तं सुश्रुतसंहितायाम्। एवं मानवजीवनस्याखिलार्थसम्पादकस्य किं वा धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थावाप्तये साधनभूतस्य शरीरस्य कायिकवाचिकमानसिकदोषापहार- कोपायविबोधकमायुर्विज्ञान परवर्तिपरम्परायामष्टाङ्गायुर्वेदनाम्ना ख्यातम्।
तानि चाष्टाङ्गानि शल्य-शालाक्य- कायचिकित्सा- भूतविद्या-कौमारभृत्य- अगदतन्त्र- रसायनतन्त्र-वाजीकरणाख्यानि 'शरीरमाद्यं खलु धर्मसाधनम्' इति कालिदासोक्तेः, 'धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्, आयुर्वेदोऽमृतं श्रेष्ठतमम्' इत्यादिचरकसंहितोक्तेश्च शरीरमेवाद्यं साधनमस्ति वेदादिशास्त्रप्रतिपादितपुरुषार्थचतुष्टयस्याधिगमे। अतस्तच्छरीरं कायेन वाचा मनसापि शश्वत् सुरक्षितं तिष्ठेदिति हेतोः परमकारुणिकैर्महर्षिभिरायुर्विज्ञानमुपदिष्टम्।

संसारेऽस्मिन् सर्वे मानवाः प्रकृत्या सांसारिकोन्नतिनिमित्ते यदा-कदा आध्यात्मिकोन्नतिप्राप्त्यर्थं प्रयत्नशीलाः भवन्ति। द्वयोः स्थितयोः नराणां सुस्वास्थ्यमत्यावश्यकमस्ति । अनया दृष्ट्या वेदेषु चिकित्सासम्बन्धिमंत्राणामाश्चर्यमयवर्णनमस्ति।
वेदस्य अथर्ववेदभागः तु चिकित्सासम्बन्धिमन्त्रैः परिपूर्णः अस्ति। आधुनिकदृष्ट्या विचारे कृते ज्ञायते यत् वेदेषु वर्णिताः चिकित्सापद्धतयः अद्यतनचिकित्सापद्धतिभिः अधिकं समृद्धा आसन्। वेदस्य ज्ञानेन नराः दुःखत्रयेभ्यः पृथक् भूत्वा सुखमयजीवनयापनं कर्तुमर्हन्ति। मनुना कथितम्-

सर्वज्ञानमयो हि सः (मनुस्मृतिः 2.7)

Since 2010
ISSN- 0976-8645
UGC RN-41039

सर्वप्रथमम् ओषधिपरकविज्ञानं गृह्णामः। ओषधयः मानवजीवनार्थममृततुल्याः सन्ति। ओषधयः मानवानाम् अनेकरूपैः कल्याणं कुर्वन्ति। ओषधयः मानवान्निरोगं कृत्वा तान् दुःखान् नाशयन्ति। ऋग्वेदे एकं सूक्तं तु केवलम् ओषधिपरकमेवास्ति एषु सूक्तेषु ओषधीनां सृष्टिः मानवसृष्टेः पूर्वं कथितम्। इमे ओषधयः नरेभ्यः अपि त्रियुगं पुरा अभवन्।

**या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।**
**मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥** (ऋग्वेदः 10.97.01)

ओषधयः मानवानां रक्षां संरक्षणञ्च कुर्वन्ति । ओषधयः मातृतुल्याः सन्ति ।

**ओषधीरिति मातरस्तद्वो देवीरुपब्रवे (ऋग्वेदः 10.97.04)**

ओषधयो मानवेभ्यः शक्तिम् उत्साहञ्च अहर्निशं प्रयच्छन्ति, अतो हेतोः नराणां शरीरं मनश्च ओजोवर्चसी भवतः ।

**विप्रः स उच्यते भिषग् रक्षोहामीवचातनः। (ऋग्वेदः 10.97.06)**

यास्काचार्येण ओषधिशब्दस्य निरुक्तिः कृता- ओषधयः ओषद् धयन्तीति वा। ओषत्येना धयन्तीति वा दोषं धयन्तीति वा अर्थात् ओषधयः शरीरेषु शक्तिं वर्धयन्ति, दोषाञ्च अपाकुर्वन्ति। शतपथ ब्राह्मणेष्वपि

**ओषधयः दोषनाशाय- कथिताः। दोषं धयेति तत ओषधयः समभवन्।**
**(शतपथब्राह्मणः 2.2.4-5)**

ओषधीषु त्रिदोषनाशनस्य पर्यावरणप्रदूषणनाशस्य च शक्तिरस्ति। अतः मानवजीवनेषु आयुर्वेदे च
ओषधीनामतिमहत्त्वमस्ति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

ओषधिः मुख्यरूपेण द्विधा अस्ति (1) वनस्पतिः (2) ओषधिः। वृक्षेभ्यः वनस्पतिशब्दस्य अथ च लघुवृक्षेभ्यः ओषधिशब्दस्य च प्रयोगो जातः। ओषधीनां वर्गीकरणमन्यप्रकारेणापि कृतम्। ऐतरेयब्राह्मणे विशिष्टं कथनमस्ति यत् वनस्पतयः प्राणस्स्वरूपाः सन्ति।

**प्राणो वै वनस्पतिः। (ऐतरेयब्राह्मणः 2.4)**

वनस्पतयः मानवेभ्यः प्राणशक्तिं (आक्सीजनं) प्रददति। अतः वनस्पतयः प्राणस्वरूपाः सन्ति। मानवस्य रक्षार्थं वृक्षाणां वनस्पतीनां च संरक्षणमत्यावश्यकमस्ति । यदाधुनिकचिकित्सकाश्चापि स्वीकुर्वन्ति। ओषधयः जीवानां रक्षणाय चिकित्सकानां प्रमुखसाधनरूपाः भवन्ति। याः सुभेषजः (उत्तमचिकित्सा) कथ्यते-

**तत् ते कृणोमि भेषज सुभेषजम्। (ऐतरेयब्राह्मणः 2.5.1)**

ओषधीनां रसैः विभिन्नौषधिनिर्माणं भवति अथ च रोगाणां चिकित्सा भवति। ओषधीनामुत्पत्तेः वृद्धेश्च आधारः वर्षाऽस्ति। अतः द्युलोकः वर्षायाः जनकः अथ च ओषधीनां पृथिव्यामुत्पत्तिकारणादेव पृथिवी माता कथ्यते।

काश्चित् ओषधयः पर्वतेषु, समतलभूमौ, नद्यां सरोवरेषु च प्राप्यन्ते। सागरस्य अन्तःस्थलेऽपि ओषधयः भवन्ति। काश्चित् ओषधयः भूमिं विदीर्य प्राप्यन्ते। काश्चित् ओषधयः प्राणिजाः अपि सन्ति याः जीवानां शृङ्गादिभ्यः प्राप्यन्ते। ओषधयः चिकित्सकस्य शक्तयस्सन्ति। कासांचित् ओषधीनामत्र संकेतः क्रियते-

1. अक्षः- अयमुदरशोधकः विरेचकः च भवति अतः विभेदकः कथ्यते।

2. अर्जुनम् - अस्थिभंगेषु रक्तस्रावेषु च अर्जुनस्य त्वक्चूर्णीकृत्य लेपनं कुर्यात्। अस्य क्वाथो हृद्रोगे प्रयुक्तः रोगनिवारणं करोति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

3. आस्रवभेषजः- अथर्ववेदे अस्योल्लेखः वर्तते। अयं कुशस्य पर्यायोऽस्ति, अयं रक्तस्रावमवरोधयति।

4.कर्कन्धुः- यजुर्वेदेषु अस्य वर्णनं प्राप्नोति। इदं बदरीफलमस्ति। अस्य चूर्णं यज्ञेषु प्रयुज्यते। इदं वीर्यवर्धकं पुष्टिकारकञ्चास्ति ।

**शल्यविज्ञानम्**

वेदेषु शल्यविज्ञानस्य बहुमंत्राणां वर्णनं प्राप्यते। ऋग्वेदाथर्ववेदयोः विशेषरूपेण चिकित्सासम्बन्धिमन्त्राणां समावेशः प्राप्यते। शल्यचिकित्साविज्ञानेन सम्बद्धाः ये मन्त्राः सन्ति, ते प्रायः अश्विनीकुमाराभ्यामिन्द्रेण च सम्बद्धाः सन्ति। अश्विनीकुमारौ देवतानां वैद्यौ आस्ताम्। तौ कायचिकित्सासु शल्यचिकित्सासु च प्रवीणौ आस्ताम्।

**देवानां भेषजौ (यजु. 21.53)**

असम्भाव्यकार्यमपि अश्विनीकुमारौ कर्तुं समर्थौ आस्ताम्। अतः ऋग्वेदस्य अनेकेषु सूक्तेषु अश्विनीकुमारयोः कार्याणामुल्लेखो दृश्यते। चरकमतानुसारं आयुर्वेदस्योत्पत्तिः ब्रह्मणोऽभवत् । ब्रह्मणः सकाशात् दक्षप्रजापतिः, दक्षप्रजापतेः अश्विनीकुमारौ, अश्विनीकुमाराभ्याम् इन्द्रः, इन्द्रात् भारद्वाजः, भारद्वाजात् च अन्ये ऋषयः प्राप्तवन्तः ।

**ब्रह्मणा हि यथाप्रोक्तम् आयुर्वेदं प्रजापतिः। जग्राह निखिलेनादावश्विनौ तु पुनस्ततः ।। अश्विन्यां भगवान् शक्रः प्रतिपेदे ह केवलम्। (चरकसूत्रम्, 4.5)**

मंत्रेषु अश्विनीकुमाराभ्यां निमित्तं विशेषणद्वयं मुख्यरूपेण प्राप्यते। प्रथमं दस्त्रमिति, द्वितीयं नासत्यमिति। उपर्युक्तविशेषणमश्विनीकुमारयोः कार्याणि विशेषयति। दस्त्रशब्दस्यार्थः चिकित्सासु निपुणकर्ता, नासत्यशब्दस्यार्थः यस्य कुत्रापि अभावो

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

न विद्यते अर्थात् सर्वत्र विद्यमानं नासत्यमिति सायणाचार्येणाऽपि मधुप्रवर्ग्यविद्ययोः उल्लेखः कृतः-

**युवाभ्यां प्रवर्ग्याविद्यां मधुविद्यां च वक्ष्यामि (सायण- ऋग्वेदः 1.117.22)**

इमे विद्ये इन्द्रात् दधीचिः ततश्च अश्विनीकुमारौ लब्धवन्तौ। अथर्ववेदे मधुविद्यायाः वर्णनं प्राप्यते। अस्यां विद्यायां जीवनेषु माधुर्यस्य, मधुरवचनस्य, तेजस्वितायाः वाक्तत्त्वानां माहात्म्यवर्णनमस्ति। आध्यात्मिकार्थेषु इयं विद्या सच्चिदानन्देश्वरस्य प्रतिपादिकाऽस्ति । परन्तु भौतिकार्थेषु इयं विद्या आयुर्वेदेन सम्बद्धाऽस्ति । अस्याः विद्यायाः तिस्रः भेदाः वर्तन्ते। प्रथमं रसायनशास्त्रम्, द्वितीयं संधानशास्त्रम्, तृतीयं-मृतसंजीवनीशास्त्रञ्च । रसायनशास्त्रमाध्यमेन पुरुषेषु नवचेतनायाः संचारप्रयोगः भवति। संधानशास्त्रेषु क्षत- विक्षताङ्गानां सन्धिकार्यं भवति। मृतसंजीवनीविद्यायां मृतशरीरस्य पुनर्जीवनप्रदानस्य कार्यं सञ्जायते। अद्यतने शरीरस्य प्रत्येकाङ्गानां प्रत्यारोपणकार्यं सञ्जायते। परन्तु शिरः पृथक् कृत्वा तत्स्थाने जीवान्तरस्य शिरः संयोजनमसम्भवं प्रतीयते। किन्तु प्रवग्र्यापिकक्ष्यविधयोरन्तर्गत शिरश्छेदनं विधाय पुनरपि तत्स्थाने अन्यस्य जीवस्य शिरस्संयोजनस्य विधिः प्राप्यते। इयं अतिरहस्यास्पदं च विद्या। अश्विनीकुमाराभ्यां अथर्वणः पुत्रस्य दधीचेः शिरश्छित्वा एकत्र संस्थाप्य तथा च तत्स्थाने अश्वशिरः तस्य शरीरेण संयोजितम्। अनेन प्रकारेण शल्यंविज्ञानस्य उल्लेखनीयं चामत्कारिकं वर्णनं श्रुतिषु प्राप्यते। अश्विनीकुमाराभ्यां प्रज्ञाचक्षवे राजर्षिऋजाश्वाय दृष्टिज्योतिः प्रादायि।

**आक्षीऋज्राश्वे आश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे।**
**(ऋग्वेदः 1.117.17)**

अश्विनीकुमाराभ्यां कृते कथितं यत् अश्विनीकुमारौ अन्धानां निर्बलानाञ्च चिकित्साविशेषज्ञौ आस्ताम्।

**अन्धस्य चिन्नासत्या कृशस्य चिद् युवामिदाहुर्भिषजा रुतस्य चित्**
**(ऋग्वेदः 10,39,3)**

Since 2010
ISSN- 0976-8645
UGC RN-41039

वर्तमानसमये आपणे कामसम्बन्धी ओषधीनां प्रचलनमधिकं दृश्यते। परन्तु तासामोषधीनां शरीररेषु दुष्प्रभावःजायते, तात्कालिक किञ्चिद् क्षणमेव प्रभावश्च दृष्यते। परन्तु वेदेषु वृद्धपुरुषेभ्यः यौवनप्रदानस्य अनेकोदाहरणं प्राप्नोति। अश्विनीकुमाराभ्यां स्वदक्षतया वृद्धच्यवनऋषिमहोदयाय पुनः यौवनं प्रदत्तम् ।

**युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः। (ऋग्वेदः 1.117.13)**
अनया रीत्या अश्विनीकुमाराभ्यां कलिमहोदयाय च्यवनऋषिमहोदयाय चापि यौवनं प्रदत्तम्।

**उपसंहारः**

अतिविस्तृतम् आरोग्यक्षेत्रम्। आवश्यकता अस्ति यत् सारभूतानि तत्वानि सङ्कलय्य शाश्वतम् आरोग्यलाभं प्राप्नुयाम। अस्माकं जीवने वैदिकयज्ञानामाध्यात्मिकं वैज्ञानिक महत्त्वमस्ति। यावन्तः नियमाः धर्मशास्त्रैः मानवेभ्यः निर्धारितास्ते सर्वेऽपि आयुर्विज्ञानाञ्चिताः सन्ति। पूर्व लोकाः धार्मिकाः आसन्। अत एवास्माकं वैज्ञानिकाः ऋषयः आयुर्विज्ञानं धर्मैः संयोज्य लोकान् भृशमुपकृतवन्तः। वेदवेदाङ्गधर्मशास्त्रादिषु पदे पदे ये आचाराः विहितास्ते सर्वेऽपि वैज्ञानिकाः आयुर्विज्ञानस्य संवाहकाः।

नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।
दाता समः सत्यपरः क्षमावान् आप्तोपसेवी च भवत्यरोगः

यस्तावत् हितम् आहारं सेवते मितं च विहारं कुरुते, विचारपूर्वकं कार्ये प्रवर्तते, स्रगादिषु जागतिकेषु विषयेषु अनासक्तो भवति, दानशीलोऽस्ति, सुखे दुःखे च निर्विकारो भवति, सत्यं वदति, तितिक्षुः विद्यते, मित्राणि च सेवते स नूनं रोगविहीनो भवतीति तात्पर्यम् ।

Since 2010
ISSN- 0976-8645
UGC RN-41039

एवं संस्कृतवाङ्मये आयुर्विज्ञानं प्रत्यक्षतः परोक्षतो वा सर्वत्रैव वर्णितम्, तेषां दिङ्मात्रमिहोद्दिष्टमिति दिक्।

---

## सन्दर्भग्रन्थसूची


- कुमारसम्भवम् - चौखम्बाप्रकाशनम्
- वेदविज्ञानम् –प्रमोद्कुमार पाठकः - वाराणसी
- योगदर्शनम् – काले अन्तर्जालतः ।
- ऋग्वेदसंहिता-साक्षि प्राकशनम्-बेंङ्गलूरु
- ऐतरेयब्राह्मणम् –अ भा मा प - बेंङ्गलूरु
- सुश्रुतसंहिता ,चरक संहिता – चौखम्बाप्रकाशनम्
- वैद्यकीयसुभाषितसाहित्यम्- ८.
- आयुर्वेद का वैज्ञानिक इतिहास, सत्यव्रत शर्मा.
- अथर्ववेदः - साक्षि प्राकशनम्-बेंङ्गलूरु

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# कोटा क्षेत्र की मूर्तिकला में प्रदर्शित आभूषण

## डॉ. मोनिका गौतम

**प्रमुख शब्द-** शिव, जीवन, कोटा, मूर्तिकला, आभूषण

**शोधसार-** साक्षात् शिव के लिए एवं जीवन में अशिव का परिहार करने के लिए मांगल्य दृष्टि का प्रयोजन है। सौभाग्यवती स्त्री जो अपने पति के लिए दीर्घायु की कामना करती है, उसे हल्दी, केसर, सिन्दूर, कज्जल, कंचुक, ताम्बूत, मांगलिक आभूषण, वेणी प्रसाधन, मस्तक, मणिबंध तथा कर्णाभूषणों को धारण करना नहीं भूलना चाहिए।[1] मार्कण्डेय पुराण में स्पष्टतः उल्लेख है–

हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा
कूर्पासकञ्च ताम्बूलं माङ्गलयाभरणं शुभम्।।
केशसंस्कार–कबरी–कर–कर्ण विभूषणम्।
भर्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता।।

केशों का धूपादि से संस्कार, वेणी प्रसाधन, चूडापाश में पुष्पसज्जा, आभूषणों में कंगन, कर्णावतंस, पायल, बिछुए, मस्तक की टीका, शिरोभूषण एवं कटिमेखला नारी के लिए मंगल दृष्टि से विहित माने गए हैं। आभरण का प्रचलन ''चारूता'' को ''सौभाग्य फला'' बनाने की मंगल दृष्टि से हुआ है।

यजुर्वेद में उल्लेख है कि स्वर्ण धारण करने वाले को राक्षस और पिशाच क्षति नहीं पहुँचा सकते।[2] भारतीय ज्योतिष परम्परा में नौ प्रमुख रत्नों का सम्बन्ध नवग्रहों से जोड़ा गया है। अतः ग्रह–दोष के निवारण हेतु भी राजा से लेकर जनसाधारण तक स्वर्ण–रजत आदि धातुओं और रत्नों को उत्साह से धारण करते आए हैं।

''आ समन्तात् भूषणम् अलङ्करणम्।'' जो शरीर की शोभा को समग्र रूप से बढ़ाए, उसे आभूषण कहते हैं। आभूषण के बिना वनिता का सुन्दर मुख भी सुशोभित नहीं होता–

''ना कान्तमपि निभूषं विभाति वनितामुखम्।[3]

ऋग्वेद के एक मंत्र में प्रयुक्त 'सोमा अरङ्कृता' का 'अरङ्कृत' शब्द कदाचित् 'अलंकृत' शब्द का ही प्राचीन रूप है।[4] अथर्ववेद के एक मंत्र में

Since 2010
ISSN- 0976-8645
UGC RN-41039

'स्वरङ्कृता' शब्द इसी अर्थ में प्रयुक्त हुआ है।[5] ऋग्वेद[6] में एक स्थान पर इंद्र को भुजा पर 'आभरः' धारण करने वाला कहा गया है जिससे आगे 'आभरण' शब्द प्रचलित हुआ। षोडश श्रृंगार के साथ सामान्यतः द्वादश आभुरणों की मान्यता भी प्रचलित हुई।[7] स्वर्ण धातु निर्मित एवं विविध रत्नों की निर्मित अलंकार वैभव के प्रतीक ही नहीं, सौन्दर्यवर्धन के साधन उसी में यदि आयु, कांति, पुष्टि एवं जय प्रदाता होने के कारण मांगलिक भी माने–जाते थे।[8]

सोमेश्वर कृत मानसोल्लास में कहा गया है कि रत्न निर्मित भूषणों को धारण करने से रत्नों के अधिदेवता संतुष्ट होते हैं और महती श्री प्रदान करते हैं।[9]

भरतमुनि ने आभूषणों को चार भागों में विभक्त किया है[10]–

1. आवेध – जो शरीर के अंग बींधकर पहने जाते है, जैसे कर्णाभूषण, कुण्डल आदि।
2. बन्धनीय – जो अंग विशेष में ऊपर से बाँधकर पहने जाते है, जैसे श्रोणीसूत्र (करधनी), अंगद, भुजबंध आदि।
3. प्रक्षेप्य – वह आभूषण जिनमें शरीर का अंग प्रक्षेपित करके उन्हें धारण किया जाए। जैसे नुपुर, वलय आदि।
4. आरोप्य – वह आभूषण जो शरीर में ऊपर से आरोपित किए जाए, जैसे हेमसूत्र तथा विविध प्रकार के हार।

अश्वघोष, कालिदास और बाणभट्ट आदि ने श्रृंगार के अनेक प्रकारों का विशद् विवरण प्रस्तुत किया है। शिशुपालवध, श्री कण्ठचरित, गीतगोविन्द आदि काव्यों में नारी श्रृंगार और प्रसाधन सामग्री का काव्यमय चित्रण प्राप्त होता है। मूर्तिकला में भी श्रृंगार एवं आभूषण सम्बन्धी अंकन दिखाई देते हैं। कोटा क्षेत्र का शिल्पकार भी मूर्तियों में इन आभूषणों के सूक्ष्म उत्कीर्णन में सफल हुआ है। अमरकोष में उल्लिखित आभूषण सूची[11] जो मस्तक के मुकुट से प्रारंभ चरण–किंकिणी पर समाप्त होती है, इनमें से अधिकांश आभूषण कोटा क्षेत्र की मूर्तिकला में उत्कीर्ण दिखाई देते हैं।

इनका विवेचन निम्न आधार पर किया जा सकता है–

**1. शिरोभूषण –**

पुरूषों के मस्तक पर 'चूड़ामणि' और 'मुकुट' नामक आभूषणों का उल्लेख भरतमुनि ने नाट्यशास्त्र[12] में किया है, जो राजाओं और देवमूर्तियों के लिए विहित थे–

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

चूडामणिः समुकुटं शिरसो भूषणं स्मृतम्।

विष्णु प्रतिमाओं में किरीट मुकुट का अंकन दिखाई देता है। इनमें विष्णु, ओघाड़, 9 वीं शताब्दी ई., लक्ष्मी–नारायण प्रतिमा, राजकीय संग्रहालय झालावाड़ में संग्रहीत उल्लेखनीय है।

पुरूषों के शिरोभूषण की भाँति स्त्रियां भी विविध प्रकार के शिरोभूषण धारण करती थी। प्रागैतिहासिक कालीन स्थानों से प्राप्त सामग्री में केशों के नीचे बाँधने के स्वर्ण पत्रक प्राप्त हुए हैं, जिनका प्रयोग केशों को अलंकृत करने और उन्हें यथास्थान व्यवस्थित रखने के लिए किया जाता था।

ऋग्वेदिक काल में 'कुरीर' और ओपश शब्द स्त्रियों के शिरोभूषण के रूप में उल्लिखित है। 'कुरीर' का विवाह के समय वधू के श्रृंगार में प्रमुख स्थान था। मान्यता थी कि नववधू की विदा के समय उसे सदुपदेश के साथ 'कुरीर' और 'ओपश' धारण कराए जाएँ जिससे उसकी मनोकामना पूर्ण हो और वह वर का अनुगमन करे।[13]

बूड़ादीत के सूर्य मंदिर की बाह्य प्रवाल पर उत्कीर्ण सुरसुंदरी वाम हस्त में पद्म लिए हुए एवं दक्षिण हस्त से उत्तरीय पकड़े हुए है। मस्तक पर घुँघराले केशों के बीच मणियों एवं रत्नों से जड़ा हुआ शिरो भूषण दिखाई देता है, ये 'ओपश' के सदृश्य जान पड़ता हैं। (चित्र सं. 1) इसके ऊपर दोहरा जूड़ा सा बनाया गया है और दो जूड़ों के मध्य बिन्दु को 'चूड़ामणि' से अलंकृत किया गया है। उज्जवल नीलमणि में द्वादश आभरणों के अन्तर्गत चूड़ामणि को उल्लिखित किया गया है। इसे ही जीवगोस्वामी ने शीर्षफल संज्ञापित किया है।[14] पाणिनी ने 'कुम्बा' अर्थात् जाल शब्द का उल्लेख किया है।[15] इसमें मुक्ताजाल का उल्लेख किया है जो स्त्रियों के मस्तक के आभूषण थे। इस प्रकार का मुक्ताजाल नामक शिरोभूषण भी कोटा क्षेत्र से प्राप्त सुरसुंदरी की मूर्तियों में प्रदर्शित है। नाट्यशास्त्र में चूड़ामणि, शीर्षजाल, शिखापाश, शिखाव्याल, ललाट पर ललाट तिलक आदि शिरोभूषण वर्णित हैं।[16] मुक्ताजाल और शीर्षजाल मोतियों और धातुओं से बनी जालियों से बनता था। मेघदूत में कालिदास ने अलंकार रूप में रत्नजाल (पूर्वमेघ–30, 66) एवं


1. विष्णु, ओघड़, 9वीं शताब्दी ई.


2. सुरसुंदरी, सूर्य मंदिर, बूड़ादीत

Since 2010
ISSN- 0976-8645
UGC RN-41039

मुक्ताजालग्रथित अलकों (पूर्वमेघ–67) का वर्णन किया है। बाडोली के घटेश्वर महादेव के अर्द्धमंडप के अष्टकोणीय स्तम्भ पर उत्कीर्ण सुरसुंदरियों के जुड़े में एक विशिष्ट आभूषण को अलंकृत दिखाया गया है जो ''मणिजालक'' के समान है।[17] ललाट पर बाँधी जाने वाली 'ललाटिका' को 'पत्रपाश्या' भी कहा गया है। यह स्वर्ण की लम्बी पट्टिकाएं होती थीं।[18]




प्लेट 14. कोटा क्षेत्र की मूर्तिकला में प्रदर्शित विभिन्न प्रकार की मेखलाएँ

सूर्य मंदिर, झालरापाटन की बाह्य प्रवाल पर उत्कीर्ण खंडिता नायिका के शीश पर ललाटिका जिसे सीमन्त में रत्न एवं मनकों के बीच लटकन के रूप में प्रदर्शित किया गया है।[19] शेरगढ़ के लक्ष्मीनारायण मंदिर की बाह्य प्रवाल पर उत्कीर्ण एक सुरसुंदरी हस्त में पद्म लिए एवं तीन लड़ियों वाला शिरोभूषण धारण किए हुए प्रदर्शित है।[20] इसकी एक लड़ी केशों के मध्य सीमन्त को सुशोभित करती हुई पीछे की ओर जूड़े तक चली गई है। शेष दो लड़ियाँ मस्तक को घेरती हुई मध्य वाली प्रथम लड़ी से पीछे की ओर मिल गई है। यह शिरोभूषण पट्टीनुमा है जिस पर साइड में तथा सीमन्त के बीच केरीनुमा संरचना कुछ बड़े




प्लेट 15 कोटा क्षेत्र की मूर्तिकला में विभिन्न कर्णफूलों का अंकन

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

आकार में बनी हुई है जो राजस्थानी अलंकरण शैली एवं आभूषण कला का बोध कराती है।

**2. कर्णाभूषण –**

अमरकोश[21] में दो प्रकार के कर्णाभूषणों का उल्लेख हुआ है –

(i) कर्णिका एवं (ii) कुण्डल।

कर्णों को बींधकर उनमें धातु निर्मित तार के आभूषण पहनने का प्रचलन प्रागैतिहासिक काल में ही हो गया था। ऋग्वेद में स्वर्णनिर्मित कर्णाभूषणों के लिए ''कर्णशोभना'' शब्द प्राप्त होता है। कर्णाभूषण कोटा क्षेत्र से प्राप्त विष्णु प्रतिमाओं में दिखाई देता है। राजकीय संग्रहालय, झालावाड़ में संरक्षित अर्द्धनारीश्वर प्रतिमा में शिव भाग के कर्ण में कर्णनलिका प्रदर्शित है।

सोमेश्वर कृत मानसोल्लास में वर्णित कर्णाभूषण 'पूर्णमध्य' सूर्य मंदिर, झालरापाटन की बाह्य प्रवाल पर उत्कीर्ण शिशुमति के कर्ण में उत्कीर्ण है। इसमें कर्णाभूषण के मध्य का पूर्णभाग मुक्ताओं से जटिल है। (चित्र सं. 5) अधिकाशंतः नायिका मूर्तियों में कर्णफूलों के विभिन्न प्रकार प्रदर्शित किए गए हैं।

राजकीय संग्रहालय, कोटा में संरक्षित[22] एक अप्सरा मूर्ति में कर्ण के ऊपरी भाग पर एक सूमर समान अलंकरण उत्कीर्ण हैं जिसमें एक मनके के साथ तीन लड़े नीचे की ओर लटक रही है। इसकी पहचान राजस्थानी आभूषण 'एरण' के रूप में की जा सकती है, जिसे कर्ण में ऊपर पहना जाता है।




प्लेट :16 कोटा क्षेत्र की मूर्तिकला में प्रदर्शित विविध हार

**3. कण्ठाभूषण –**

भारतीय स्त्री–पुरूष प्राचीन काल से ही कण्ठ को आभूषणों से अलंकृत करने के प्रेमी रहे हैं।

Since 2010
ISSN- 0976-8645
UGC RN-41039



सिन्धु सभ्यता के अवशेषों में प्राप्त रंगीन मनकें उनकी आभूषणप्रियता का परिचय देते है। वैदिक युग से 'निष्क' नामक आभूषण का परिचय प्राप्त देते है। रामायण एवं महाभारत काल में मणि, मुक्ता एवं रत्न से ग्रंथित स्वर्णहारों का पर्याप्त प्रचलन प्रारम्भ हो चुका था। अमरकोश में कण्ठाभूषणों में ग्रैवेयक (कंठभूषा), ललन्तिका, प्रालम्बिका (स्वर्णकंठिका), उस सूत्रिका (मौक्तिक कंठिका) एवं हार (मुक्तावली) को उल्लेख प्राप्त होता है।[23]

कण्ठाभूषणों में कोटा क्षेत्र की मूर्तियों में एकवाली अर्थात् मोतियों की माला, ग्रैवेयक और कहीं–कहीं नाभि तक लम्बा दोहरा हार, हेमसूत्र दिखाई देते हैं। गदा मंदिर, अटरू की बाह्य प्रवाल पर उत्कीर्ण श्रृंगारप्रिया की ग्रीवा में मुक्तामाला सुशोभित है। चित्र सं. 1 में पद्महस्ता की ग्रीवा में दीर्घसूत्र प्रदर्शित है। कृष्णविलास स्टोर में संरक्षित उमा महेश्वर प्रतिमा (संख्यांक KVS/149) की ग्रीवा में गैवेयक दिखाई देता है। बाडोली के घटेश्वर महादेव मंदिर के मुखमंडप के स्तमी पर उत्कीर्ण सुरसुंदरी की ग्रीवा में हार में दो पत्तियों के ऊपर एक मनके को पिरोकर निर्मित हार प्रदर्शित है। इसके मध्य से लम्बी मोतियों की लड़ी लटक रही है, जिसके मध्य में पेंडेट है। एक अन्य हार जिसमें कुछ–कुछ दूरी पर पुष्पकलिका समान संरचना प्रदर्शित है, भी



3. सुरसुंदरी, घटेश्वर महादेव मंदिर, बाड़ोली



4. नायिका, सूर्य मंदिर, झालरापाटन

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

सुशोभित है। (देखे चित्र सं. 9) शेरगढ़ के लक्ष्मीनारायण मंदिर की बाह्य प्रवाल पर उत्कीर्ण सुरसुंदरी मूर्ति में कंठहार के मध्य बिन्दु से जुड़कर वक्षस्थल के मध्य से होता हुआ संपूर्ण कटि प्रदेश को घेरे हुए पीछे की ओर बाँधा गया एक विशिष्ट आभूषण ध्यान आकर्षित करता है यह संभवतः 'त्रिवेणी' नामक वक्षोभूषण हैं, जो मृच्छकटिकम्[24] में वर्णित है। (देखे चित्र सं. 4)

विष्णु प्रतिमाओं में मोती तथा जंघा तक लटकती हुई वनमाला अथवा वैजयंतिका भी दिखाई देती है। पालेश्वर महादेव मंदिर की बाह्य प्रवाल पर उत्कीर्ण गणेश–शक्ति युगल प्रतिमा में गणेश को धनवीर[25] नामक आभूषण पहने हुए दर्शाया गया है।




प्लेट- 19 कोटा क्षेत्र की मूर्तियों में प्रदर्शित विशिष्ट आभूषण

4. **<u>बाहुभूषण</u>** –

बहु में स्कन्ध ओर कूर्पार (कोहनी) के मध्य प्रगण्ड पर एक बन्धनीय आभूषण पहनने का प्रचलन प्राचीन है। केयूर और अंगद ये बाहुभूषण पुरूषों के प्रिय आभूषण थे, किन्तु स्त्रियाँ भी इन्हें धारण करती थीं। वाल्मीकि रामायण के किष्किन्धा काण्ड में रावण द्वारा अपहरण के समय सीता द्वारा गिराए गए आभूषणों को देखकर लक्ष्मण कहते हैं–

नहं जामामि केयूरे नाहं जानामि कुण्डले।

अंगद, केयूर के ऊपर बाँधा जाने वाला विशेष आभूषण था।चित्र सं. 7 में शिशुमति के बाहु में भी केयूर अलंकृत है।

5. **<u>मणिबंध (प्रकोष्ठ) भूषण</u>** –

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

मणिबंध या कलाई में धारण किए जाने वाले आभूषणों में मुख्यतः वलय एवं कटक विशेष प्रचलित रहे हैं। इन्हें 'प्रक्षेप्य' अलंकार माना जाता है।

सिन्धु सभ्यता के अवशेषों में सीप, मिट्टी आदि से निर्मित कंगन प्राप्त हुए हैं। ये एक ही हाथ में पहनने की प्रथा थी। वैदिक युग में कलाई पर पहना जाने वाला आभूषण 'वाल' या जो, संभवतः आगे चलकर 'वलय' कहलाने लगा।[26] वाल्मीकि रामायण में रत्नजड़ित स्वर्ण के हस्ताभूषणों का उल्लेख हुआ है। महाभारत[27] में वर्णित है कि स्त्रियाँ चूड़ियां पहनती थी। कालान्तर में चूड़ियां पहनने की यह प्रथा भरहुत, साँची और सतना की मूर्तियों में स्पष्टतः दृष्टिगत होती हैं।कोटा क्षेत्र की मूर्तियों में वलय मात्र निम्न वर्ग की नारी मूर्तियों में दिखाई देते हैं। राजसी महिला की कलाई में कंगन जिन्हें राजस्थानी आभूषण 'गोखर', के समान माना जा सकता है प्रदर्शित हैं।अधिकांशतः सुरसुंदरी, अप्सरा एवं नायिका मूर्तियों में चूड़ियां ही प्रदर्शित हैं जिनके दोनों किनारे पर कंगन अलंकृत किए गए हैं। (देखे चित्र सं. 4 ) राजकीय संग्रहालय, कोटा में संरक्षित एक चामरिका मूर्ति में उसके दक्षिण हस्त में चूड़ियां एक नलिकाकार संरचना द्वारा जुड़ी हुई प्रतीत होती हैं।



9. सुरसुंदरी, घटेश्वर महादेव, बाड़ोली



10. गणेश–शक्ति, पलेश्वर महादेव मंदिर, हरिपुरा

( चित्र सं. 11 )

वलय पुरूष मूर्तियों में दर्शाए गए हैं।

6. कटिभूषण –

प्राचीनकाल से ही कटिप्रदेश को अलंकृत करने के लिए करधनी जैसे आभूषण की परिकल्पना की गई। यह बनधनीय अलंकार है। अमरकोश में नारी के कटिभूषण के रूप में मेखला, काची, सप्तकी, रशना और सारसन आदि नाम उल्लिखित है।[28] रामायण काल में कटिमेखला का 'काची' नाम

Since 2010
ISSN- 0976-8645
UGC RN-41039

विशेष प्रचलित था। कालान्तर में काची रत्नजड़ित हुई और 'मणिमेखला' कहलाने लगी। मौर्यकालीन मृण्मूर्तियों में 'त्रिसरमेखला' और शुंगकाल के सिरिमा देवता में पंचसर वाली मेखला अलंकृत की गई।

कोटा क्षेत्र की मूर्तिकला में कटिमेखला स्त्री एवं पुरूष मूर्तियों में दोनों में प्रदर्शित है।

चित्र सं. 1 में प्रदर्शित सुरसुंदरी मूर्ति में मेखला सुशोभित है जिससे मणिमालाएँ एवं लॉकेट सहित लम्बी लटकनें जुड़ी हुई हैं। बूड़ादीत झालरापाटन, अटरू, भण्डदेवरा आदि सभी क्षेत्रों से प्राप्त नायिका मूर्तियों में त्रिसर एवं पंचसर वाली मेखला प्रदर्शित हैं जिन पर कुछ–कुछ दूरी पर विभिन्न आकारों वाली मुक्तक तथा मध्य में चंद्रिका अलंकृत दिखाई देती है।

**7. पाद–गुल्फ भूषण –**

नख–शिख आभरणों की श्रृंखला में अंतिम परन्तु सर्वांगीण आकर्षक चरण के प्रक्षेप्य 'आभूषण विशिष्ट स्थान रखते हैं। भरतमुनि ने नुपुर, किङ्किणीका एवं घण्टिका को पाद गुल्फ भूषण बताया है। आगे वे पैरों में धारण किए जाने वाले तीन आभूषणों का उल्लेख करते हैं–पैरों में पादपत्र, अंगुलियों में अङ्गुलीयक और अंगुष्ठ में तिलक।[29]

सामान्यतः नुपूर कहलाने वाला पाद् आभूषण के लिए वैदिक युग में 'खादि' शब्द का प्रयोग हुआ। मैक्समूलर ने इसका अर्थ 'मोटा कड़ा' कहा है। मौर्यकाल के मूर्तिशिल्प में नलिकाकार पादभूषण, शुंगकाल में चक्राकार निर्मित हुए।

कोटा क्षेत्र की मूर्तिकला में चामरिका मूर्तियों में कड़े एवं कहीं–कहीं दोहरी पायल दिखाई देती है। उमा महेश्वर, अटरू, 9वीं शताब्दी ई. एवं लक्ष्मी–नारायण प्रतिमाओं में घुंघरू या कंगूरे वाली दोहरी पायल अलंकृत हैं। राजकीय संग्रहालय, कोटा में संरक्षित एक विधिविता मूर्ति में पैरों में 'Toe Ring' भी प्रदर्शित है।[30]

कोटा क्षेत्र की मूर्तिकला में मुझे नासाभूषण एवं हस्ताभूषण या ऊर्मिका (अंगूठी) के अलंकरण प्राप्त नहीं हुए हैं।

उपरोक्त विवेचन से स्पष्ट है कि शास्त्रीय एवं काव्य ग्रंथों में विवरित आपादमस्तक धारण किए जाने वाले आभूषण कोटा क्षेत्र के मूर्ति शिल्प में

Since 2010
ISSN- 0976-8645
UGC RN-41039

उत्कीर्ण किए गए हैं जो इस क्षेत्र में आभूषण प्रियता और सौन्दर्य दृष्टि को भी रेखांकित करता है।

## संदर्भ


1. वि॥लंकार अत्रिदेव, प्राचीन भारत के प्रसाधन, भारतीय ज्ञानपीठ, काशी, 1958 ई., पृ. 39
2. वाजसनेयी संहिता, 34/51–52
3. भामहकृत काव्यालङ्कार, 1/13
4. ऋग्वेद, 1/3/1
5. अथर्ववेद, 10/1/25
6. ऋग्वेद, 8/97/1
7. रूपगोस्वामी, उज्जवलनीलमणि, राधाप्रकरण, 10, सं. पं. दुर्गाप्रसाद एवं पणशीकर, काव्यमाला, निर्णय सागर प्रेस, बम्बई
8. वजसनेयी संहिता, 34/40
9. सोमेश्वर कृत मानसोल्लास, गवर्नमेंट ब्रांच प्रेस, मैसूर, 1926 ई., 3/8/1185
10. भरतमुनि नाट्यशास्त्र, सं. बाबूलाल शुक्ल चौखंबा संस्कृत संस्थान, वाराणसी, 23/13–14
11. अमरसिंह, अमरकोश, पं. हरगोविन्द शास्त्री, चौखंबा संस्कृत संस्थान, वाराणसी, वि.सं. 2039, 2/6/101–102
12. भरतमुनि कृत नाट्यशास्त्र, 23/16
13. स्तोमा आसतप्रतिधयः कुरीरं छनद ओपशः।
    सूर्याया अश्विना वराग्निरासीत्पुरोगवः।।
    ऋग्वेद, 10/85/8
14. जीवगोस्वामी, लोचन रोचिनी टीका, नीलमणि राधाप्रकरण, पृ. 10
15. पाणिनी, अष्टाध्यायी, 23/2,23
16. भरतमुनिकृत नाट्यशास्त्र, 23/22,23
17. चित्र सं. 2
18. अग्रवाल, वासुदेवशरण, हर्षचरित एक सांस्कृतिक अध्ययन, बिहार राष्ट्रभाषा परिषद, पटना, 1964 ई.
19. चित्र सं. 3
20. चित्र सं. 4
21. अमरकोश 2/6/103

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

22. राजकीय संग्रहालय, कोटा संख्याक 393, कृष्णविलास, 10वीं शताब्दी
23. अमरकोश 2/6/104–106
24. शूद्रक कृत मृच्छकटिकम्, सं. जयशंकर लाल त्रिपाठी, कृष्णदास अकादमी, वाराणसी, 1986 ई., 23/24
25. छनवीर – यह एक कड़ीनुमा आभूषण है। इसमें दो लड़ियां वक्ष पर क्रास करती हुई जुड़ी हुई प्रतीत होती है, जिनके मध्य में एक लॉकेट लगा होता है। चित्र सं.
26. ऐतरेय ब्राह्मण, आनंदाश्रम मुद्रणालय, पुणे 1977 ई,
27. वेदव्यास कृत, महाभारत, कर्णपर्व भण्डारकार ओरिएण्टल इस्टीट्यूट पूना, 16/7
28. अमरकोश, 2/6/108–09
29. भरतमुनिकृत नाट्यशास्त्र, 23/40,41
30. चित्र सं. 12

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# भारतीयवैज्ञानिकचिन्तनम्

**श्वेता पनवार**[5]

**प्रमुखशब्दाः-** भारतीयपरम्परा, आविष्काराः, विषुवतरेखाः, अक्षांशरेखाः, देशान्तररेखाः

**शोधसारः-** भारतीयपरम्परा केवलं धार्मिका एव आसीत् किन्तु एतत् सत्यं नास्ति इति विद्वासः मन्यन्ते । अपितु भारतीयमनीषिभि भारतीयज्ञानपरंपरा धार्मिकेण सह वैज्ञानिकमपि कथिता। भारतीयविज्ञानपरम्परायां सृष्टेः आरम्भादेव वैदिकसाहित्ये वेदेषु च विज्ञानतत्त्वानि दृश्यन्ते । वेदेषु चराचरभूतोपकारणानि शाश्वत्मूल्यनिष्ठानि वैज्ञानिकीविचारधारा निहिता वर्तते। विज्ञानस्य स्रोतः वेदेषु एव प्राप्यते इति प्रमाणयितुं प्रयत्नः कृतः । यजुर्वेदे चन्द्रं सूर्यस्य रश्मिभिः प्रकाश्यते। ऋग्वेदे अपि सूर्यः जगतः ऊर्जायाः स्रोतः इत्युक्तम्।

सेव सूर्यः जगतः जीवानां जीवनदाता अस्ति। तस्यैव सूर्यस्य किरणाः विद्युत्प्रवाहस्य चुम्बकीयतरङ्गस्य च प्रवाहस्य कारणं भवन्ति, एतत् ऋग्वेदे अप्युक्तमस्ति। अनेन सहास्माकं वेदेषु अनेके आविष्काराः प्राप्यन्ते यथा ऋग्वेदे द्रव्यस्य ऊर्जारूपेण परिवर्तनस्य प्रमाणानि सन्ति, ऊर्जातः द्रव्यं प्रति, अस्माकं जगति प्रचलितस्य नानाप्रकारस्याग्निः अथर्ववेदस्याथर्वऋषिणापि वर्णितमस्ति।

ऋग्वेदे त्रयः प्रकाराः आविष्काराः उल्लिखिताः सन्ति तदतिरिक्तं ऋग्वेदे चुम्बकीयबलस्य विद्युत्प्रभारस्य चोल्लेखः कृतः अस्ति। अथर्ववेदे अपि स्पष्टं कृतमस्ति यत् ओजोनस्तरस्य वर्णनेन सहास्य वर्णं सुवर्णवर्णीयं कृतमस्ति।

आधुनिककाले वनस्पतयः हरितक्लोरोफिलस्य माध्यमेन स्वभोजनं निर्मान्ति इति सिद्धमभवत्, परन्तु एतत् वैज्ञानिकं तथ्यमस्माकं वेदेषु अपि लभ्यते।

अस्माकं पृथिव्यां विषुवतरेखाः, अक्षांशरेखाः, देशान्तररेखाः च अस्माकं वैज्ञानिकैः वर्णिताः, येषां प्राचीनतास्माकं वेदैः सूचितास्ति । एतदतिरिक्तं ब्राह्मणारण्यकोपनिषद्ग्रन्थानामप्यस्मिन् परम्परायां प्रगतिः अभवत् । अस्माकं

[5] Research scholar, Maharishi Valmiki sankrit University Kaithal Harayana

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

वैज्ञानिकज्ञानं, अस्माकं भारतीयज्ञानपरम्परां चाग्रे नेतुं ते साहाय्यं कृतवन्तः। सृष्टेः आरम्भादेव भारते एतादृशं वैज्ञानिकदर्शनं दृश्यते।

ये ऋषयः मुनयः च मन्त्रसाक्षात्कारं कृतवन्तः ते वैज्ञानिकाः आसन्। सृष्टिरहस्यं प्रति तस्य भावः, जिज्ञासा चातीव प्रबलः आसीत्। अस्माकं वैदिकसाहित्यमतीव गतिशीलं साहित्यमस्ति। एवं अस्माकं वेदाः प्राचीनतापूर्णाः, वैदिकर्षिभिः वर्णिताः, ये मया अस्मिन् पत्रे वर्णिताः। मम एतत् पत्रं एतत् प्राचीनतां वैज्ञानिकतां च प्रस्तौति।

**भारतीय-वैज्ञानिक- चिंतनम्**

सामान्यतः आधुनिकाः विद्वांसः अवगच्छन्ति यत् भारतीयानां परंपरा धार्मिकी अस्ति। तत्र वैज्ञानिकतायाः सर्वथाभावः। किन्तु एषावधारणा सत्येतरा।

वस्तुतः पाश्चात्य-शिक्षा-प्रभावेण एषः मतः विद्वद्भिः स्थापितः यदस्मिन् जगति यत्किञ्चिदपि वैज्ञानिकं तत् पाश्चात्यं किन्तु भारतीयानां वैज्ञानिकी परंपरा सृष्टेरादितः एव वैदिकेषु साहित्येषु दृश्यते।

पाश्चात्य-जगति 1653 इति वर्षे -गैलीलियो-इटेलियन-खगोल-शास्त्रिणा ज्ञातं यत् पृथ्वी सूर्यस्य परिक्रमां करोति। सः प्राचीन-कालतः प्रचलितामवधारणां यत् सूर्यः पृथ्वीं परिक्रमत्यस्वीकारं कृतवान् येन कारणेन सः चर्चस्य कोपभाजनमभवत्। किन्त्वस्मिन् संदर्भे भारतीय-वैज्ञानिकतायाः कथनमस्ति-

**क्षाः(पृथ्वी) शुष्णं(सूर्यं) परि प्रदक्षिणित्।१**

**आयं गौः(पृथ्वी) पृश्निरक्रमीद् असदन् मातरं(अन्तरिक्षं)पुरः। पितरं(सूर्यं) च प्रयन् स्वः।२**

**स वा एष(आदित्यः) न कदाचनास्तमेति, नोदेति।३**

**स वा एष(आदित्यः) न कदाचनास्**
**तमयति, नोदयति।४**

यजुर्वेदे वर्णितं यत् चन्द्रमा सूर्यस्य सुषुम्णारश्मीणां प्रकाशात् प्रकाशितं भवति।

**सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः।५**

ईसापूर्वाष्टशताब्दयां यास्केनाप्यस्य पुष्टिः कृता-

**अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीव्यति। आदित्यतोऽस्य दीप्तिर्भवति।६**

ऋग्वेदे यजुर्वेदे च सूर्यः संसारस्य ऊर्जायाः स्रोतः –

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

**सूर्य आत्मा जगतस्तस्थुषश्च।७**

ऋग्वेदे एषः उल्लेखः अप्यस्ति यत् सूर्यमंडलः रजस्युक्तः –

**सूर्यस्य चक्षू रजसैत्यावृतम्।८**

सूर्यं परितः धूममस्ति

**शकमयं धूमम् आराद् अपश्यम्,**
**विषूवता परं एनावरेण।९**

अथर्ववेदे सूर्यस्य सप्त-रश्मीनां वर्णनमस्ति अपि च ताः वर्षायाः कारणं भवन्ति-

**अव दिवस्तारयन्ति सप्त सूर्यस्य रश्मयः।**
**आपः समुद्रिया धाराः।१०**

एताः रश्मयः संसारस्य सर्वान् पदार्थान् रूपाणि ददति। एताः उच्च-मध्यम-निम्न-भेदादेकविंशतिः भवन्ति। एताः सर्वेषां रूपाणां कारणं भवन्ति-

**ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः।११**

ऋग्वेदे सूर्यस्य रश्मिभ्यः विद्युत्प्रवाहस्य चुम्बकीय-तरंगानां च प्रवाहस्योल्लेखोऽस्ति-

**मित्रावरुणा(मित्रः धनात्मकावेशः वरुणः ऋणात्मकावेशः) रथर्यतः साकं सूर्यस्य रश्मिभिः।१२**

**यो वां मित्रावरुणाऽजिरो (अजिरः अति सक्रियः) दूतो (दूतः चुम्बकीयतरंगः) अद्रवत्। अयःशीर्षा मदेरघुः(मदेरघुः अतितीव्रः)१३**

ऋग्वेदे यजुर्वेदे च सौर-ऊर्जायाः आविष्कारस्य प्रयोगस्य च श्रेयः त्रितमर्थातेन्द्रं गन्धर्वं वसुं दीयते-

**त्रित एनम् आयुनक्, इन्द्र एणं प्रथमो अध्यतिष्ठत्।**
**गन्धर्वो अस्य रशनाम् अगृभ्णात्, सूरादश्वं वसवो निरतष्ट।।१४**

एकः परमाणुः अन्यं परमाणुमाकर्षति यस्योल्लेखः ऋग्वेदे अस्ति-

**एको अन्यत्-चकृषे विश्वम् आनुषक्।१५**

ऊर्जाद्रव्ययोः रूपांतरणस्य आविष्कारस्य श्रेयः प्रो. आइनस्टाइनमहोदयं प्रदीयते। ऋग्वेदे द्रव्यात् ऊर्जायाः, ऊर्जायाः द्रव्यस्य च रूपांतरणस्य प्रमाणं प्राप्यते-

**अदितेर्दक्षो अजायत, दक्षाद् उ-अदितिः परि।१६**

विश्वस्य प्रतिकणे अग्नेः विद्यामानता तस्याः च विभिन्न-रूपाणां वर्णनं ऋग्वेदे यजुर्वेदे अथर्ववेदे चोपलभ्यते। ऋषिणाथर्वणा त्रयः आविष्काराः कृताः –

१)अरणि-मथनादग्निः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

२) जल-मथनादग्निः

३) भूगर्भीय-अग्निः पुरीष्य-अग्निः वा

ऋग्वेदे एव मरुतेषु चुम्बकीय-शक्तिः, तस्याः शक्तेः विकिरणं चुम्बकीय-तरंगानां विद्युतावेशस्योल्लेखोऽस्ति-

**मरुतः..... अयोदंष्ट्रान् विधावतः।**

**अग्नयो न स्वविद्युतः ।१७**

ऋग्वेदे ओजोन-सतहस्य कृते **"महत्-उल्ब" इति** शब्दः अस्ति। अथर्ववेदे अस्य वर्णः स्वर्णः अस्ति-

**महत् तदुल्बं स्थविरं तदासीद्।**

**येनाविष्टितः प्रविवेशिथापः।।१८**

**तस्योत जायमानस्य-उल्ब आसीद् हिरण्ययः।१९**

मित्रावरुणयोः संयोगात् जलस्य निष्पत्तिः भवति।

**मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्।**

**धियं धृताचीं साधन्ता।२०**

अथर्ववेदस्य मन्त्रेकस्मिनवितत्वस्योल्लेखः अस्ति येन कारणेन पत्राणां वर्णः हरितः भवति यत् 'क्लोरोफिल' इति कथ्यते।–

**अविर्वै नाम देवता-ऋतेनास्ते परीवृता।**

**तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः।।२१**

वृक्षेषु प्राणाः भवन्ति ते श्वसन्ति ते तिष्ठन्तं शेरते इत्यथर्ववेदे वर्णितः –

**महद् ब्रह्म..... येन प्राणन्ति वीरुधः।२२**

**अस्थुर्वृक्षा ऊर्ध्वस्वप्नाः।२३**

यजुर्वेदः निर्दिश्यते जलं प्रदूषितं मा कुरु वृक्ष-वनस्पतीनां कर्तनं निषिद्धम्-

**माऽपो हिंसीः, मा- ओषधीर्हिंसीः।२४**

**अपः पिन्व, ओषधीर्जिन्व।२५**

तैत्तिरीय- संहितायां वात-ऋतु-दिग्-तेजस्-ओजस्यंत्राणां वर्णनमस्ति-

**वातानां यन्त्राय, ऋतूनां यन्त्राय, दिशां यन्त्राय, तेजसे यन्त्राय, ओजसे यन्त्राय।२६**

ऋग्वेदे अथर्ववेदे च विषुवत् रेखायाः उल्लेखः अप्यस्ति यस्याधारेण सूर्यस्योत्तरायणस्य दक्षिणायनस्य वा भवितुं निर्धारणं भवति-

**विषूवता परं एनावरेण।२७**

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

बोधायन-कात्यायनशूल्बसूत्रयोः प्राप्तं भवति यदायतस्य कर्णः द्वयोः क्षेत्रफलयोः उत्पन्नं करोति-

**दीर्घचतुरस्रस्याक्षणया रज्जुस्तिर्यङ्गानी पार्श्वमानी च यत्**
**पृथग्भूते कुरुतः, तदुभयं करोतीति क्षेत्रज्ञानम्।२८**

किन्तु एते सर्वे आविष्काराः वैज्ञानिकतायाः बाह्यं स्वरूपमेव निरुपितवन्तः। बाह्यं स्वरूपमन्तरिक्षस्य स्वरूपस्य प्रतिबिम्बमेव। यदात्मन्यात्मावलोकनस्य प्रवृत्तिः जागर्ति, सत्येक्षणस्य दृष्टिः पश्यति, पर्यावरणं प्रति संवेदनशीलता द्रवति, जगत् प्रति प्रदानस्योदाहरता वर्धते, सर्वे भवन्तु सुखिनः इति कामना जायते तदा सम्यक् दृष्टिः सम्यक् ज्ञानस्य दर्शनं करोति किं ग्राह्यं किं त्याज्यं इति विचार्य कर्ता कर्माणि करोति तदेव वैज्ञानिकता उद्भवति।

एतादृश्याः वैज्ञानिकतायाः दर्शनं भारतवर्षे सृष्टेः आरम्भेव दृश्यते। मन्त्रद्रष्टारः ऋषयः वैज्ञानिकाः। सृष्टेः रहस्यं प्रति तेषां बलवती जिज्ञासा तान् सदैव जागरूकान् चिन्तनशीलान् प्रयोगवतः अकरोत्।

वैदिकं साहित्यं सततरूपेण प्रवहमान् साहित्यम्। उपासनायाः कर्मपर्यन्तं(यज्ञपर्यन्तं) ततः ज्ञानं प्रति सहजः विकासः अभवत्। तत्रैव उपनिषत्सु ज्ञानस्य विविधतासु मूलस्य तत्त्वस्यैकता। एतस्य परिणतिः सूत्र-साहित्ये दृश्यते।

वैदिकं साहित्यं विचार्य कणादेन वैशेषिकदर्शनं, गौतमेन न्यायदर्शनं, जैमिनिना पूर्वमीमांसा, कपिलेन सांख्यदर्शनं, पतञ्जलिना योगदर्शनं, वेदव्यासेन वेदान्तदर्शनं प्रणीतम्। एतादृशः वैज्ञानिकः इतिहासः भारतीयतायाः।

पुराणेष्वार्षमहाकाव्ययोः रामायणे महाभारते च विमानादीनां विविधानां शक्तिशालिनां शस्त्राणामस्त्राणां च विवरणं प्राप्यते। वेदव्यासः परमाण्वास्त्रस्य ब्रह्मास्त्रस्य कृते सन्धानेपि तत् वारयितुं समर्थः आसीत्। एतादृशी आसीत् तत्कालीन वैज्ञानिकता। सम्भवतः वैज्ञानिकोपकरणानामृषिभिः लोककल्याणदृष्ट्या पर्यावरणसंरक्षणदृष्ट्याधुनिकीकरणं न कृतम्।

मध्यकाले आधुनिककाले च प्राचीनकालस्य विज्ञानस्य वैज्ञानिकीकरणं न कृतं किन्तु वैज्ञानिकातायाः लोपः नाभवत्।

अधुना वेद-वेदाङ्गेषु निहितायाः वैज्ञानिकतायाः अनुसंधानं करणीयम्।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

**सन्दर्भग्रन्थसूची-**

1. ऋग्वेद १०.२२.१४
2. यजुर्वेद ३.६
3. ऐतरेय ब्राह्मण ३.४४
4. गोपथ ब्राह्मण २.४.१०
5. यजुर्वेद १८.४०
6. निरूक्तम् २.६
7. ऋग्वेद १.११५.१, यजुर्वेद ७.४२
8. ऋग्वेद १.१६४. १४
9. ऋग्वेद १.१६४.४३
10. अथर्ववेद ७.१०७.१
11. अथर्ववेद १.१.१
12. ऋग्वेद ८.१०१.१-२
13. ऋग्वेद ८.१०१.३
14. ऋग्वेद १.१६३.२, यजुर्वेद २९.१३
15. ऋग्वेद १.५२.१४
16. ऋग्वेद १०.७२.४
17. ऋग्वेद १.८८.५
18. ऋग्वेद १०.५१.१
19. अथर्ववेद ४.२.८
20. ऋग्वेद १.२.७
21. अथर्ववेद १०.८.३१
22. अथर्ववेद १.३२.१
23. अथर्ववेद ६.४४.१
24. यजुर्वेद ६.२२
25. यजुर्वेद १४.८
26. तैत्तिरीय संहिता १.६.१.२
27. ऋग्वेद १.१६४.४३, अथर्ववेद ९.१०.२५

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भ ग्रन्थ

- ऋग्वेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी, 1973(जम्मू से प्राप्त छायाप्रति अनुसार)
- यजुर्वेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी, 1973(जम्मू से प्राप्त छायाप्रति अनुसार)
- अथर्ववेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी, 1973 (जम्मू से प्राप्त छायाप्रति अनुसार)
- तैत्तिरीय संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी, 1973(जम्मू से प्राप्त छायाप्रति अनुसार)
- निरुक्त, यास्क, सं लक्ष्मणसरूप, लाहौर, 1927

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# विष्णुधर्मोत्तरपुराणे प्रतिपादितानां कर्मकाण्डविषयाणां परिचयः

**डॉ० विवेकशर्मा[6], राज कुमार[7]**

**प्रमुखशब्दाः-** विष्णुधर्मोत्तरपुराणम्, कर्मकाण्डम्, व्रतम्, यागः, संस्कारः, पूजनम्, जपम्, दानम्।

**शोधसारः –** विष्णुधर्मोत्तरपुराणे कर्मकाण्डस्य सर्वे विषयाः विस्तृतरूपेण वर्णितास्सन्ति। विष्णुधर्मोत्तरपुराणमपि व्रतस्य उपवासस्य च महतां प्रदर्शयति। विष्णुधर्मोत्तरपुराणे देवपूजनम्, ग्रहपूजनम्, नक्षत्रपूजनम्, अतिथिपूजनम्, गुरुपूजनम्, गोपूजनम्, ब्राह्मणपूजनम् इत्यादीनां फलसहितं विस्तृतवर्णनं विधिपूर्वकं विद्यते। एवं सर्वविधकर्मकाण्डरीतयः विष्णुधर्मोत्तरपुराणे वर्णितास्सन्ति । एतासां सम्यकनुशीनलनेन भारतीय कर्मकाण्डपरम्परायाः संरक्षणं भविष्यतीति।

वयं जानीमः यत् साधारणतया इच्छापूर्तये, अनिष्टपरिहाराय वा यज्ञ-यागादीनां क्रियानां विधिरूपूवर्कं, नियमानुसारं वा स्वयं पुरोहितद्वारा वा सम्पादनमेव कर्मकाण्ड इति । कर्मकाण्डस्य आधारस्तु वेद एव। वेदादारभ्य कर्मकाण्डः उत्तरोत्तरः ब्राह्मणग्न्थेषु, आरण्यकग्रन्थेषु, पुराणेषु इतिहासग्रन्थेषु च समुपलभ्यते। अस्मिन्नेव क्रमे विष्णुधर्मोत्तपुरामपि कर्मकाण्डस्य सन्दर्भे अतुलनीयं वर्तते। मानवजीवने जन्मनः पूर्वादारभ्य मृत्योपरान्तं विविधधार्मिकक्रियाः कालानुसारं सम्पाद्यन्ते। काश्चिद् क्रियाः मावनः स्वयमेव करोति यथा व्रतम्, उपवासम्, पूजनम्, देवस्तुतिः इत्यादयः। काश्चित् क्रियाः पुरोहितद्वारा क्रियते यथा षोड्शसंस्काराः, यज्ञमित्यादयः। एताः सर्वाः धार्मिकक्रियाः कर्मकाण्डे एव अन्तर्निहितास्सन्ति। विष्णुधर्मोत्तरपुराणे कर्मकाण्डस्य इमे विषयाः विस्तृतरूपेण वर्णितास्सन्ति।

[6] सहायकाचार्य, संस्कृत विभाग, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला
[7] शोधार्थी, संस्कृत विभाग, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला

Since 2010
ISSN- 0976-8645
UGC RN-41039

तिथिग्रहणनं कर्मकाण्डस्य कृते महत्त्वपूर्णं विद्यते। कस्याः तिथेः ग्रहणमपेक्षितं भवति, इत्यस्मिन् विषये विष्णुधर्मोत्तरपुराणं वर्णयति यत् यस्यां तिथौ सूर्योदितो भवति तस्यामेव तिथौ निर्दिष्टकार्यस्य सम्पादनं भवति।

**सा तिथिस्तदहोरात्रं यस्यामेवोदितो रविः ।।**
**तया कर्माणि कुर्वीत ह्रासवृद्धिर्न कारणम् ।।**
**शुक्लपक्षे तिथिर्ज्ञेया यस्यामभ्युदितो रविः ।।**[8]

सन्ध्योपासनायाः प्रमाणमपि विष्णुधर्मोत्तरे प्राप्यते। अहोरात्रस्य सन्धिरेव सन्ध्या इत्यपि तत्र वर्णितमस्ति।

**सन्ध्यामुपास्य प्रयतः कृतजप्यः समाहितः ।**
**अग्न्यागारं प्रविश्याथ वह्नीन् पश्येत्पुरोधसा ।।**[9]
**दोषा विभावरी रात्रिः शर्वरी यामिनी क्षपा ।**
**सन्धिः प्रोक्ता तथा सन्ध्या अन्धकारं तमः स्मृतम् ।।**[10]

**व्रतमुपवासञ्च**

व्रतस्य उपवासस्य च परम्परा भारतीयसंस्कृतौ आदिकालतः प्रचलिता वर्तते। अद्यापि व्रतमुपवासञ्च भारतवर्षीयानां जीवनस्याभिन्नाङ्गवत् विद्येते। विष्णुधर्मोत्तरपुराणमपि व्रतस्य उपवासस्य च महतां प्रदर्शयति। व्रतम् इति शब्दः "व्रियते इति" (वृञ् वरणे+बाहुलकात् अतच्, सच कित्)। पुण्यजनकोपवासाद्यर्थे भवति । व्रतशब्दस्य पर्य्यायः नियमः, पुण्यकम्, नियामः, संयमः आदयः शब्दाः। व्रतस्य विधिसन्दर्भे आचार्यः देवलः अनेन वर्णयति -

**अभुक्त्वा प्रातराहारं स्नात्वा चैव समाहितः ।**
**सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ।।**
**ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्ज्जनम् ।**
**व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ।।**[11]

---

[8] विष्णुधर्मोत्तरपुराणम्, 1.60.25-26
[9] विष्णुधर्मोत्तरपुराणम्, 2.151.07
[10] विष्णुधर्मोत्तरपुराणम्, 3.9.2
11 मदरत्नः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

विष्णुधर्मोत्तरपुराणं प्रायः सर्वेषां व्रतानां विषये वर्णनं करोति। प्रत्येकस्य व्रतस्य विधिः, ग्राह्यतिथिः फलञ्च प्रतिपादितं वर्तते। श्रवणनक्षत्रयुक्तद्वादशीव्रतस्य विधिः फलञ्च द्रष्टव्यम् -

**या राम श्रवणोपेता द्वादशी महती च सा।**
**तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनम् ।।**
**प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलम् ।**
**दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे ।।**
**वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च ।**
**न दुर्गतिमवाप्नोति गतिमन्याञ्च विन्दति ।।**[12]

रव्यादिसप्तवासराणां उपवासस्य फलं क्रमशः दीर्घायुः, आरोग्यम्, ऐश्वर्यम्, कामनासिद्धिः, अखण्डविद्याप्राप्तिः, सौभाग्यम् सर्वशत्रुनाशश्चेति वर्णितम्। अत्र स्नानपूर्वकं सूर्यभगवतः वर्षं यावत् पूजायाः विधानं वर्तते।

**पूजितः प्रयतैः स्नानैः सोपवासैर्दिने रवेः।**
**संवत्सरं महाभाग दीर्घमायुः प्रयच्छति ।।**
**सोमवारे महाभाग चारोग्यं संप्रयच्छति ।**
**तथा भौमदिने राम वैश्वर्यं संप्रयच्छति ।।**
**वासरे सोमपुत्रस्य सर्वान्कामान्प्रयच्छति ।**
**अभीष्टाञ्च तथा विद्यामाखण्डलगुरोर्दिने ।।**
**सौभाग्यमतुलं लोके भार्गवाह्नि प्रयच्छति ।**
**तथा शनैश्चरस्याह्नि रिपून्सर्वान्व्यपोहति ।।**[13]

**पूजनम्**

ईष्टप्राप्तये अनिष्टपरिहारे वा पूजनस्य अर्चनस्य वा विधानं प्रशंस्ते। अभीष्टदेवताप्रीत्यर्थं विविधप्रकारेण पूजनं क्रियते। देवावाहनात् देवविसर्जनं यावत् आसन-स्नास-पुष्प-धूप-दीप-नैवेद्य-वस्त्र-दक्षिणादिभिः पूजनं सम्पाद्यते। प्रसन्नचित्तेन पूजनस्य विधानं पुराणेषु मिलति। यथा-

[12] विष्णुधर्मोत्तरपुराणम्, 1.60.2-4
[13] विष्णुधर्मोत्तरपुराणम्, 1.59.2-5

Since 2010
ISSN- 0976-8645
UGC RN-41039

**क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च।**
**मत्पूजनं विधानेन यदीच्छेत् परमां गतिम्॥**[14]

विष्णुधर्मोत्तरपुराणे देवपूजनम्, ग्रहपूजनम्, नक्षत्रपूजनम्, अतिथिपूजनम्, गुरुपूजनम्, गोपूजनम्, ब्राह्मणपूजनम् इत्यादीनां फलसहितं विस्तृतवर्णनं विधिपूर्वकं विद्यते।[15] कामनानुसारं कस्य देवस्य पूजनमपेक्षितं भवति, विषयेऽस्मिन् ज्ञानमपि प्राप्यते। चतुर्मूर्तेः पूजनं सर्वकामनासिद्ध्यर्थे, अनिरूद्धस्य धर्मप्राप्तये, अर्थाय सङ्कर्षणस्य, कामाय प्रद्युम्नस्य, मोक्षाय वासुदेवस्य पूजनं विधीयते।[16]

---

[14] वराहपुराणम्, 134.59-60

[15] तत्रोपोष्य शिरःस्नातैः कर्त्तव्यं देवतार्चनम्।
जपं होमं तथा दानं कामयद्भिर्महत्फलम्॥
विष्णुधर्मोत्तरपुराणम् 1.60.१५

[16] सर्वकामप्रदं देवं चतुर्मूर्तिं तु पूजयेत्॥
पूजयेदनिरुद्धन्तु धर्मकामो नरः सदा॥
तथा सङ्कर्षणं देवमर्थकामस्तु पूजयेत॥
कामकामोऽपि राजेन्द्र प्रद्युम्नं पूजयेद्विभुम्॥
पूजयेन्मोक्षकामस्तु वासुदेवं जगत्प्रभुम्॥
पुत्रकामस्तथा राजन्पद्मनाभं च पूजयेत्॥
तथाश्वशिरसं देवं विद्याकामस्तु पूजयेत्॥
भोगानामाप्तकामस्तु पूजयेद्भोगशायिनम॥
भोगिभोगासनासीनं स्थानकामस्तु पूजयेत्॥
मत्स्यं संपूजयेद्देवं धान्यकामो नरः सदा॥
तथैवारोग्यकामस्तु कूर्मदेवं च पूजयेत्॥
कामस्तथा हंसं नृसिंहमथ वा विभुम्॥
विद्याकामोऽथ वाल्मीकिं व्यासं वाप्यथ पूजयेत्॥
सांख्यज्ञानपरिज्ञानहेतवे कपिलं तथा॥
भूतिकामो वराहं तु नृवराहमथार्चयेत्॥
व्यवहारे रणे द्यूते जयकामस्तथा पृथक्॥
धर्मकामस्तथा धर्मं ब्रह्माणं चापि पूजयेत॥
शत्रूणां नाशकामस्तु महादेवं तु पूजयेत्॥
पूजयेद्भार्गवं रामं प्रतिज्ञापारणेच्छया॥
अथ वा राजशार्दूलं रामं दशरथात्मजम्॥
श्रीकामस्तु महाराज श्रीसहायं च पूजयेत्॥
बलकामस्तथा देवं बलभद्रं प्रपूजयेत्॥
तमेव राजशार्दूलं कृषिकर्मप्रसिद्धये॥
सर्वकामप्रदं देवं यथेष्टीं तनुमास्थितम्॥
पूजयेत्सर्वशक्तित्वात्सर्वकामफलप्रदान्॥

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

अनेनैव प्रकारेण विद्याप्राप्तये देव्याः सरस्वत्याः पूजनस्य विधानमस्ति। सरस्वत्याः पूजनेन सह पुस्तकपूजनस्य निर्देशमपि विद्याकामस्य कृते वर्तते।

**विद्यामाप्नोति विपुलां पूजयित्वा सरस्वतीम् ।**
**विद्याकामस्तु कुर्वीत तदा पुस्तकपूजनम् ।।**[17]

**यज्ञम्**

जनाः जन्मनः एव ऋषि-देव-पितृभिः इति त्रिभिः ऋणैः ऋणवन्तः भवन्ति। ब्रह्मचर्येण ऋषि-ऋणात्, यज्ञेन देव-ऋणात् प्रजया (सन्तत्या) च पितृ-ऋणात् विमुक्ताः भवन्ति।[18]

यज्ञः भारतीयसंस्कृतेः मूलाधारः विद्यते। अद्यापि भारतीयाः जनाः कस्यापि कार्यस्य आरम्भः यज्ञ-हवनपूर्वकमेव कुर्वन्ति। यज्ञानां परम्परा वैदिककालतः प्रचलिता वर्तते। विष्णुधर्मोत्तरपुरामपि यज्ञस्योपादेयता सर्वोपरि मन्यते। अस्य पुराणस्यानुसारं यज्ञमेव जीवनस्याधारं वर्तते।

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा ।**
**देवाधीनाः प्रजा सर्वा यज्ञाधीनाश्च देवताः ।।**
**यज्ञो हि भगवान्विष्णुर्यत्र सर्वं प्रतिष्ठितम् ।**
**यज्ञार्थं पशवः सृष्टा देवास्त्वौषधयस्तथा ।।**
**यज्ञार्थं पुरुषाः सृष्टाः स्वयमेव स्वयंभुवा ।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत् ।।**[19]

विष्णुधर्मोत्तरपुराणे वृत्रासुरस्य कथायां भगवान् श्रीहरिः स्वयमेव निर्दशति यत् अश्वमेधेन सह मामेव यजनं (यज्ञम्) कुर्वन्तु। अहमेव धर्मणः पुनस्स्थापनां करिष्यामि।

**यजतां सोऽश्वमेधेन मामेव सुरसत्तमाः ।**

---

निराशिषः पूजयितो वरेण्यं देवेश्वरं वासुदेवं पुराणम्।।
यथेष्टदेहोपगतं नृवारं स्थानं तदुक्तं परमं हि यत्स्यात् ।।

विष्णुधर्मोत्तरपुराणम्, 3.118.2-14

[17] विष्णुधर्मोत्तरपुराणम्, 3.221.73

[18] जायमानो वै ब्राह्मणास्त्रिभिर्ऋणैर्ऋणवान् जायते ।
ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । तैत्तिरीयसंहिता 3.10.5

[19] विष्णुधर्मोत्तरपुराणम्, 3.262.1-3

Since 2010
ISSN- 0976-8645
UGC RN-41039

**अहमेव करिष्यामि विपाप्मानं बिडौजसम् ।।**[20]

श्रीविष्णुधर्मोत्तरपुराणे प्रथमखण्डे मार्कण्डेयवज्रसंवादे अग्निकार्ये प्राक्तन्त्रोत्तरतन्त्रविधिर्नाम्नि अध्याये यज्ञस्य सम्पूर्णविधिरुक्तं वर्तते। तत्र यज्ञवेदीनिर्माणात् पूर्णाहुतिर्यावत् यज्ञप्रयुक्तैः मन्त्रैः सार्धं वर्णनं प्रतिपादितमिति। गृहस्थाश्रमाणां कृते विशेषरूपेण पञ्चमहायज्ञानाम् अर्थात् देवयज्ञस्य, भूतयज्ञस्य पितृयज्ञस्य, ऋषियज्ञस्य मानुष्ययज्ञस्य च विधिसहितं वर्णनं प्राप्यते।

**पञ्चयज्ञान्सदा कुर्याद् गृही पापापनुत्तये ।।**
**देवयज्ञं भूतयज्ञं पितृयज्ञं तथैव च ।**
**मानुष्यमृषियज्ञं च कुर्यान्नित्यमतन्द्रितः ।।**
**देवयज्ञं हुतं विद्याद् भूतयज्ञं बलिक्रिया ।**
**पितृयज्ञं तथा पिण्डैरृषियज्ञं च भार्गव ।।**
**स्वाध्यायसेवा विज्ञेया तथैवातिथिपूजनम् ।**
**मनुष्ययज्ञो विज्ञेयः पञ्चयज्ञान्न हापयेत् ।।**[21]

**जपम्**

एकस्यैव मन्त्रस्य बारं बारं पुनरावृत्तिः एव जपमिति सर्वविदितमेव। भारतीयसंस्कृतौ वैदिककालतः एव [22]गायत्री इत्यस्याः जपस्य महिमा विद्यते सर्वोपरि। यथोक्तमपि-

**नास्ति गङ्गासमं तीर्थं नास्ति कृष्णसमा गतिः ।**
**गायत्रीसदृशं जप्यं होमं व्याहृतिभिः समम् ।।**[23]

गायत्रीजपस्य सम्पूर्णविधिः पुराणेऽस्मिन् जपसंख्यासहितं फलसहितञ्च वर्णितमस्ति। जपमिदं स्नात्वा, कुशशय्यां स्थितं भूत्वा, विशेषेण पूर्वाह्ने अर्थात्

---

20 विष्णुधर्मोत्तरपुराणम्, 1.24.25
21 विष्णुधर्मोत्तरपुराणम्, 2.95.8-11
22 गानाद्वा त्रायते यस्माद्गायत्री वा तदा स्मृता ।। विष्णुधर्मोत्तरपुराणम्, 1.165.१०
23 विष्णुधर्मोत्तरपुराणम्, 3.274.07

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

प्रातःकाले विधातव्यम्।[24] गायत्रीजपस्य फलं विषये विष्णुधर्मोत्तरपुराणे इदं वर्णनं प्राप्यते-

**ये जपन्ति सदा तेषां न भयं विद्यते क्वचित् ॥**
**दशकृत्वा प्रजप्ता सा रात्र्यह्ना यत्कृतं लघु ।**
**तत्पापं प्रणुदत्याशु नात्र कार्या विचारणा ॥**
**शतं जप्ता तु सा देवी पापोपशमना स्मृता ।**
**सहस्रजप्ता सा देवी चोपपातकनाशिनी ॥**
**लक्षजापेन च तथा महापातकनाशिनी ।**
**कोटिजाप्येन राजेन्द्र यदिच्छति तदाप्नुयात् ॥**
**विद्याधरत्वं यक्षत्वं गन्धर्वत्वमथापि वा ।**
**देवत्वमथवा राज्यं भूर्लोके हतकण्टकम् ॥**
**कोटिसाहस्रजाप्येन निष्कामः पुरुषोत्तम ।**
**विधिना राजशार्दूल प्राप्नोति परमं पदम् ॥**[25]

नवग्रहाणां सन्दर्भेऽपि यज्ञनिमित्तं, पूजननिमित्तं जपनिमित्तञ्च वैदिकमन्त्राणां संकलनमपि विष्णुधर्मोत्तपुराणे वर्णितमस्ति।

**आकृष्णेति च मन्त्रोऽयमादित्यस्य प्रकीर्तितः ॥**
**इमं देवेति सोमस्य अग्निर्मूर्धा कुजस्य तु ।**
**उद्बुध्यस्वा बुधस्यापि मन्त्रः प्रोक्तो नरेश्वर ॥**
**बृहस्पते अति यदर्यो मन्त्र उक्तो बृहस्पतेः ।**
**अन्नात्परिस्रुतेत्येवं मन्त्रः शुक्रस्य कीर्तितः ॥**
**शन्नोदेवीति सौरस्य काण्डात्काण्डेति राहवे ।**
**केतुं कृण्वन्निति तथा मन्त्र उक्तश्च केतवे ॥**[26]

---

[24] कुशशय्यां निविष्टस्तु कुशपाणि जितेन्द्रियः ॥
अर्कमध्यगतं ध्यायेत्पुरुषं तं महाद्युतिम् ॥ १९ ॥
अथवार्कं महीपाल बहिः स्नातस्त्वतन्द्रितः ॥
अनन्यचित्तो मेधावी पूर्वाह्ने तु विशेषतः ॥ विष्णुधर्मोत्तरपुराणम्, 1.165.२० ॥
[25] विष्णुधर्मोत्तरपुराणम्, 1.165.11-16
[26] विष्णुधर्मोत्तरपुराणम्, 1.102.7-10

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

**दानम्**

अनिष्टपरिहाराय ईष्टप्राप्तये वा दानस्य विधानमपि भारतीयसंस्कृतौ वैदिकालत एव प्रचलितोऽस्ति। जनाः स्वेच्छया अथवा सामर्थ्यानुसारं निजकामनापूर्तये दानं कुर्वन्ति। दानसन्दर्भे काञ्चनस्य अर्थात् सुवर्णस्य दानं दीयमानेषु वस्तुषु अन्यतमं स्मृतम्। तर्हिरपि विष्णुधर्मोत्तरपुराणं नवग्रहाणां कृते विशेषदानस्य सन्दर्भे वर्णयति यत् सूर्याय वत्ययुक्ता रक्तवर्णीया धेनुः, चन्द्राय शङ्खम्, रक्तवर्णोह्यनड्वाँश्च भौमाय, काञ्चनीं स्वां प्रतिकृतिं बालक्रीडनकानि च बुधग्रहाय, गुरवे कार्पासवासांसि, सितवर्णीयः अश्वः शुक्राय, कृष्णवर्णीया सवत्सा धेनुः शनये, राहवे उष्णीषं लौहदण्डश्च, केतवे छागश्च इत्येतेषां दानं प्रशस्तमस्ति।

**ध्रुवस्थाननिविष्टानां देवतानां पृथक्पृथक् ।**
**दक्षिणार्थे प्रदातव्यं सर्वेषामेव काञ्चनम् ।।**
**रक्तां वत्सयुतां धेनुं दद्यादर्काय पार्थिव ।**
**शङ्खं दद्यान्नरेन्द्रेण दक्षिणार्थं निशाभृतः ।।**
**रक्तवर्णोह्यनड्वाँश्च दातव्यः क्षितिजस्य तु ।**
**काञ्चनीं स्वां प्रतिकृतिं बालक्रीडनकानि च ।।**
**बुधाय राजन्देयानि दक्षिणार्थे विशेषतः ।**
**क्षौमं दुकूलं कार्पासवासांसि गुरवे तथा ।।**
**सितवर्णं च तुरगं भार्गवाय प्रदापयेत् ।**
**कृष्णां धेनुं सवत्सां च दद्यात्सूर्यसुताय वै ।।**
**उष्णीषं लोहदण्डश्च दातव्यो नृप राहवे ।**
**छागश्च केतवे देयं कुतपं च नराधिप ।।**[27]

एवं ज्ञायते यत् विष्णुधर्मोत्तरपुराणे कर्मकाण्डस्य महत्त्वपूर्णानि सूत्राणि वर्तन्ते । एतानि कर्मकाण्डसूत्राणि भारतीयसनातनपरम्परायै उपकारकानि सन्ति । एतेषां सम्यकनुशीनलनेन भारतीय कर्मकाण्डपरम्परायाः संरक्षणं भविष्यतीति ।

[27] विष्णुधर्मोत्तरपुराण, 1.103.1-6

Since 2010
ISSN- 0976-8645
UGC RN-41039

# सन्दर्भग्रन्थसूची

१. विष्णुधर्मोत्तरपुराणम् प्रथमखण्डः श्री कपिलदेव नारायण चौखम्बा-संस्कृत-सीरीज वाराणसी २०१५

२. विष्णुधर्मोत्तरपुराणम् द्वितीयखण्डः श्री कपिलदेव नारायण चौखम्बा-संस्कृत-सीरीज वाराणसी २०१५

३. विष्णुधर्मोत्तरपुराणम् तृतीयखण्डः श्री कपिलदेव नारायण चौखम्बा-संस्कृत-सीरीज वाराणसी २०१५

४. पौरोहित्य-कर्म-विधिः डॉ अशोककुमारगौड वेदाचार्यः श्री ठाकुर प्रसाद पुस्तक भण्डार वाराणसी २०१२

५. यज्ञ-मीमांसा पण्डित श्रीवेणीरामशर्मा गौड चौखम्भा विद्याभवनम् वाराणसी २००३

६. कर्मकाण्ड-भास्कर,श्रीरामशर्मा आचार्य युग निर्माण योजना विस्तार ट्रस्ट, मथुरा २०१४

जाह्नवी

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

# चेतना के छांव में": आधुनिक ज्ञान परंपरा के उद्गम और भारतीय ज्ञान परंपरा के विस्थापन का बौद्धिक इतिहास

Ritwik Raj Singh[28]

**मुख्य शब्द :** भारतीय चेतना, आधुनिक ज्ञान परंपरा, औपनिवेशिक चेतना, भारतीय बौद्धिक इतिहास

*वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनां , आत्मनस्तुष्टिरेव च ।* [84]

[84] मनुस्मृति

Since 2010
ISSN- 0976-8645
UGC RN-41039

वेद धर्म है। स्मृति धर्म है , सज्जनों का आचार धर्म है , आत्मा की तुष्टि धर्म है। इन सभी धर्मों का मूल वेद है। धर्म का अन्य लक्षण है यतोभ्युदयः निःश्रेयसाधिगमः ।

यहां दो प्रयोजन अभ्युदय और निःश्रेयस प्रदर्शित हैं। यहां मेरा चिन्तन है कि अभ्युदयता प्रकृति के साथ सुसंसर्गता से आती है और यही कारण बनती है किसी भी दर्शन से निःश्रेयस की सिद्धि होती है।

**संबन्ध-** प्रकृति व्यापक है तो मनुष्य व्याप्य। वेद में त्रैतवाद संबन्ध बताता है कि वेद में तीन तत्त्व हैं प्रकृति, जीव और ईश्वर् – प्रकृति , जीव और ईश्वर् के समवेत होने पर मनुष्य बनते हैं। प्रकृति उपादान कारण है, जीव ईश्वर् निमित्त कारण से है। जीव प्रकृति के साथ अन्योन्याश्रित संबन्ध से जुडकर ईश्वर् में तादात्म्य संबन्ध के साथ रहता है।

**उपादेयता**– उक्ति है देवो भूत्वा देवं यजेत् अर्थात् देव होकर देव को पूजे। देव अर्थात् जो दे, जो प्रकाशित करे, जो खेलें। आज आवश्यकता है कि वेद में देव स्वरूप प्रकृति की तरह हो जैसे प्रकृति से हम लेते हैं उसी प्रकार उसे दें। उसके साथ भी खेलें अर्थात् व्यवहार। व्यवहार तो तब होता जब वह बात करते। प्रकृति बात करती है। वेद में देख सकते हैं कि संवादों में प्रकृति बत कर रही है। शकुनतला कीविदाई में प्रकृति भी उपहार देती है। रामचरितमानस में अशोकवाटिका में मां सीता अशोक के साथ वार्ता करती हैं। **प्रकृति की पूजा करके हम स्वर्ग और अपवर्ग की सिद्धि कर सकते हैं।**

**उपसंहार-**

'आत्मवत् सर्वभूतेषु' अर्थात् 'प्रत्येक प्राणी को अपने समान समझो।' इस विचार को प्रतिपादित करने में वैदिक ऋषियों के दृष्टिकोण।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

वनों और अन्य प्राकृतिक संसाधनों को कैसे बनाए रखा जाए। विभिन्न रूपों में पारिस्थितिकी तंत्र की स्थिरता प्राचीन काल से ही विकास का मुद्दा रही है।

जगत या ब्रह्माण्ड है प्रकृति।

**वेदोखिलो धर्ममूलम्** वाक्य में लिंग विपरिणाम होकर अर्थ होगा वेदः अखिलं धर्ममूलम्।

अभ्युदय और निःश्रेयस परम प्रयोजन है जिसका सिद्धि प्रकृति से ही हो सकती है।

पंच महायज्ञ हमें सृष्टि के कण कण में ईश्वर का वास दिखलाता है।

**संदर्भ ग्रन्थ सूची-**

- ऋगवेदादिभाष्य भूमिका, महर्षि दयानन्द सरस्वती
- वैदिक वाङ्मय और सार्वभौमिक चेतना एक अवलोकन- inspira जर्नल
- वैदिक साहित्य का इतिहास, डा. पारसनाथ द्विवेदी चौखंबा सुरभारती प्रकाशन
- सांख्यकारिका, ईश्वरकृष्णः
- स्मृतिमीमांसा व्रजकिशोर स्वाई, चौखंबा संस्कृत संस्थान

Since 2010
ISSN- 0976-8645
UGC RN-41039

# शैवसम्प्रदायः शैवाचार्याश्च

**रमन कुमार शर्मा**[85] **डॉ० विवेकशर्मा**[86]**,**

**प्रमुखशब्द** –

शैवः, कश्मीरः, धर्म, मतम्, तन्त्रम्, साधना, सम्प्रदायः, सिद्धान्तम्

**शोधसारः** –

भारतीयसंस्कृतेः ज्ञानाय आगमस्य ज्ञानं महत्वपूर्णमस्ति। निगमः आगमः उभौ अपि जनकल्याणकारिणौ स्तः। उभयोः अत्याधिकं महत्वं वर्तते। कलियुगे आगमेन विना गति नास्ति। शैवधर्मस्य इतिहासः ताम्रपाषाणयुगात् पूर्वं वा अस्ति। अयं विश्वस्य प्राचीनः धर्मः अस्ति । शैवदर्शनस्य व्यवस्थितं प्रवर्तनं कश्मीरे नवमशताब्द्या आरम्भे अभवत्। यस्यानुशीलनं शोधपत्रेऽस्मिन् विद्यते।

भारतीयसंस्कृतौ वहिरङ्गसाधनायै प्रकाशकग्रन्थ अस्ति वेदः निगमो वा वेदः अस्ति तथा च अनतरङ्ग साधनायाः प्रदर्शकः ग्रन्थः तन्त्रागम अस्ति। अस्माकं संस्कृतिः येन प्रकारेण निगमस्य अनुसरणमं करोति तेनेव प्रकारेण आगमस्य अपि आवलम्बनं करोति।

निगमः इत्युक्ते वेदःइत्येतद् [87]विद् धातोः घञ् प्रत्यये कृते वेदः इति शब्दः निष्पद्ययते यस्यार्थोभवति ज्ञानम्। अतः वेदाः ज्ञानप्रधानानि उच्यन्ते। तन्त्रः इत्येतद् तनु धातोः ष्ट्रन् प्रत्यये कृते तन्त्र इति शब्दः व्युत्पद्यते।

**तन्यते विस्तार्यते ज्ञानेन इति तन्त्रम् ( सर्व दर्शन सङ्ग्रहः )**

अर्थात् यत् शास्त्रं येन ज्ञानेन विस्तारं प्राप्नोति तच्छास्त्रं तत् शास्त्रम् तन्त्र इति उच्यते। अतएव अस्माकंसंस्कृतौ तन्त्र क्रिया प्रधानभूता उक्ताः अस्ति।

**क्रमिका ग्रन्थानुसारं** –

**तन्नोति विपुलानार्थन तन्त्रमन्त्र समन्वितताम्।**
**त्राण च कुरूते यस्मात् तन्त्रमित्यभिधियते॥**

[85] शोधार्थी, संस्कृत विभाग, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला
[86] सहायकाचार्य, संस्कृत विभाग, हिमाचल प्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला

Since 2010
ISSN- 0976-8645
UGC RN-41039

अस्यार्थो तन्त्रः भवति विपुलार्थैः सह आचरणशीलपुरुषाणां रक्षणं करोति तत् तन्त्रमित्युच्यते। तन्त्रस्य अपरनाम आगम अप्यस्ति।

**वाचस्पति लिखति यत् –**

**आगच्छन्ति बुद्धिमारोहन्ति यस्मात् अभ्युदय।**
**निःश्रेयसोपायाः स आगमः ॥**

अर्थात् अभ्युद्ययनिः श्रेयशयोः (उपायानाम्) प्रतिपादकशास्त्रम् आगमः। निगमःआगमः उभौ अपि जनकल्याणकारिणौ स्तः। उभयोः अत्याधिकं महत्वं वर्तते। कलियुगे आगमेन विना गति नास्ति।

**बिनाह्यागमार्गेण कलौ नास्ति गति प्रिय 88।**

कुलार्णवतन्त्रे अपि स्पष्टं कृतम् अस्ति यत् सतयुगे श्रुति, त्रेतायाम् स्मृतिः, द्वापरे पुराणम्, तथाच कलियुगे आगमस्य प्रधानता अस्ति –

**कृते श्रत्युक्त आचारः त्रेतायां स्मृति सम्भवः।**
**द्वापरे तु पुराणोक्त कलावागमसम्भवः ॥**

वेदस्य सुलभता सर्वेषां कृते न भवति परञ्च आगमे सर्वेषां जनानां अधिकारित्वं वर्णितमस्ति। अस्मिन् युगे वेदोक्तानुष्ठानं, जपं, ध्यानम् इत्यादयः क्रियाः जनाः कर्तुम् न प्रभवन्ति। त्यागे अपि सर्वेषां रुचि न भवति। अतः कलियुग जनाः सूक्ष्मसरलविधिनाफलप्राप्तिकामाः सन्ति। आगमः शीघ्रफलप्रदायकः अस्ति। सर्वेषां कृते समत्वेमव आगमानां लोकप्रिया अस्ति। तन्त्रशास्त्रं त्रिविधं विभक्तम् अस्ति।

1. आगमः
2. यामलः
3. तन्त्रः

कालान्तरे अनेकानाम् सम्प्रदायानाम् प्रादुर्भावात् तन्त्रशास्त्रम् अनेकेषु भागेषु विभक्तं जातम्।

88 कश्मीर का इतिहास

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039




शैवधर्मः दर्शनं च प्राचीनतमौ स्तः । यतोहि एतयोः सम्बन्धः भगवतः शिवेन अस्ति यः अनादि , नित्यः, सनातनी चास्ति । अस्माकं संस्कृतौ शिवस्य उपासना वैदिक कालाद् एव जायमानास्ति । शुक्लयजुर्वेदीय शतरुद्राष्टध्यायीग्रन्थस्य प्रचलनं समाजे सर्वत्रैवास्ति अथ शिवस्य पूजनं शैवधर्मस्य प्राचीनतां दर्शयति ।

पाशुपतमतस्य प्रचारः पश्चिमभारतस्य गुजरातप्रदेशे आसीत् । पाशुपतमतस्य संस्थापकः नकुलीशः अथवा लकुलीशः आसीत् । शिवपुराणस्य कारणवमहात्मयानुसारं नकुलीशस्य जन्म स्थानं भडोचसमीपे कारणव इत्याख्यस्थानमस्ति । अस्य मतस्य साहित्यं न्यूनम् एव उपलभ्यते । माधवाचार्येण सर्वदर्शनसंग्रहे अस्य मतस्य सिद्धान्तानां वर्णनं विहितम् । अस्य मतस्य एकमात्र ग्रन्थः माहेश्वरेण रचितः पाशुपतिसूत्रं अधुना उपलभ्यते ।

शैवसम्प्रदायस्य अपरं मतं शैव सिद्धान्तम् अस्ति । अस्य प्रचारः तमिलनाडु क्षेत्रे अस्ति । तमिलनाडु शैवसम्प्रदायस्य दुर्ग उच्यते । अस्य मतस्य अनुचराः शिवस्य तपस्यां कृत्वा स्त्रोत्राणां तथाच सिद्धान्तग्रंथानां रचना तमिलभाषायां कृतवन्तः । एते ग्रंथाः वेदवत् पवित्रग्रन्थाः उच्यन्ते ।

शैवसम्प्रदायस्य वीरशैवमत्स्य प्रचारः कर्णाटकप्रान्ते अस्ति । अस्य आचार्यस्य नाम वसवः अस्ति । सः तलचूरिराज्ञः विजलस्य इत्यस्य मन्त्री आसीत् । शैवमतस्य अनुचराः लिङ्गयता अथवा जङ्गम नाम्ना प्रसिद्धाः सन्ति । एते

Since 2010
ISSN- 0976-8645
UGC RN-41039

शैवसिद्धान्तस्य अष्टविशन्तिः आगमानां पूर्णरुपेण अंङ्गीकरणं कुर्वन्ति । तत्र वर्णव्यवस्थाया कोऽपि स्थानं न विद्यते।

प्रत्यभिज्ञादर्शनं शैवदर्शनस्य चतुर्थं मतम् अस्ति। एतत् कश्मीर शैवदर्शनम्, त्रिक्दर्शनम्, नाम्ना प्रसिद्धमास्ति । अस्य अद्वैतदर्शनस्य क्षेत्रं कश्मीरम् अस्ति । प्रत्यभिज्ञादर्शनस्य पञ्चशास्त्रः सन्ति सूत्रम् , वृतिः, विवृत्तिः, लघूविमर्शिनी, बृहदविमर्शिनी आरम्भिकत्रयाणां रचना उत्पलनेन कृतास्ति तथा शिष्यश्च अभिगुप्तेन रचिताः।

डॉ. कान्तीचन्द्रपाण्डेयः स्वपुस्तके[89] ( एतिहासिक और अध्ययन पृष्ठ 83) लिखति यत् उत्पल-अभिनवगुप्तयोः जन्मस्थानं कशमीरं नास्ति । सोमानंदस्य पूर्वजाः कश्मीरे अष्टम्यां शताव्दयां आगतः तदारभ्य उभयोः पूर्वजाः कशमीरे एव स्थितवन्तः।

कश्मीरस्य पवित्रभूम्यां, केसरेण सुगन्धितभूम्यां मातुः शारदायाः पीठस्थाने अस्य शैवमतस्य उत्पत्तिः कदा जाता इत्यस्मिन् सन्दर्भे प्रमाणानि न्यूनानि सन्ति। सम्राटअशोकात् पूर्वं कश्मीरे शैवमतं प्रचलत आसीत्। शैवधर्मस्य यत् स्वरुपं तस्मिन् समये समाजे आसीत् तत् पाशुपतशैवधर्मानुसारमासीत् [90]।

महाभारतकालीनकश्मीरस्य इतिहासः तथा भूगोलःविद्यते अपि च कश्मीरस्य इतिहासस्य प्रमाणिकप्रतिपादराजतरङ्गिणीकइत्याखय् नीलमतपुराणे ग्रन्थानुगुणं शैवधर्मसम्बन्धितस्थलानां, मन्दिराणां वर्णनं नीलमतपुराणे मिलति । शिवस्य प्रियभक्तपरशुरामेण सम्बद्धः कश्मीरःआसीत् इति नीलमतपुराणं घोषयति। कलहणः स्वराजतरंङ्गिणीग्रन्थे शिवस्य स्तुतिं करोति । तृतीय नेत्रे स्थिताग्नयाः केसरस्य कृषि कारणात् शुशोभितः तथा चपलमुखसर्पाणां कल्याणं कुर्यात् । कश्मीरस्य पापसूदनतीर्थे विराजमानस्य काष्ठरुपधारी- उमेशस्य दर्शनात् स्पर्शात् मोक्षस्य प्राप्तिर्भवति [91] ।

शकुनैः प्रपौत्रः अशोकः शैवसम्प्रदायस्य सरक्षणम् अकरोत् । अशोकः महादेवस्य भक्तः आसीत्। तेनैव षड्शितिः लक्षभवनैः युक्तं श्रीनगरम् इत्याख्यं नगरं

[89] कश्मीर एतिहासिक अध्ययन पृष्ठ 83
90 कश्मीर एतिहासिक अध्ययन पृष्ठ पृष्ठ 183
[91] राजतरङ्गिणी

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

स्थापितं। अपि च अशोकः विजयेश्वरमन्दिरस्य जीर्णोद्धारम् अपि कारितवान्। तस्य भक्तिकारणात् महादेवः तं पुत्ररत्नं प्रदत्तवान् [92]।

अशोकस्य पुत्रः जलोकः महान तेजसिवी तथा च शैव आसीत् [93]। श्रीनगरे तेन ज्येष्ठेष्वरस्य स्थापना कृता ज्येष्ठेष्वरात् सोदरतीर्थः किञ्चित दूरे आसीत् । तत्र राजा नित्यं पूजार्थं गच्छति स्म परन्तु किमपि एकदा कारणवशात् सः तत्र गन्तुं अराहं यस्मात् बहुव्यथितः जातः। तस्मिन् समये सोमतीर्थात् एकः जलधारा स्फुटिता अभूत् यस्यां धारायां स्नात्वा राजा जलोकः सोदरतीर्थस्य पुण्य अनुभूतः।[94]

विजयेश्वरमार्गे एका स्त्री मासं भोक्तुम् इच्छां प्रकटयति तदा राजा स्वस्य देहस्य अर्पणम् अकरोत् । नन्दिक्षेत्रे भगवतः भूतेशस्य पाषाणमयः सुदृढमन्दिरं निर्मित्वा पूजनं नमस्करोत तथा च ऐशवर्यादि भोगानां भोगं कृत्वा सः भार्यासहितः चीरमोचनतीर्थे स्वप्राणं त्यक्तवा शिवलोक प्रयाति । शैवश्रेष्ठः धनाढयाः राजा दामोदराभूत तेन एकस्य नगरस्य स्थापना कृता यस्य नाम दामोदरनगरम् आसीत्।

**वसुगुप्तः** –

शैवसूत्राणाम् उद्धारकः तथा च प्रथम शैवाचार्यस्य वसुगुप्तस्य समयः निर्विवादरुपेण नवमशताब्द्याः आरम्भः उच्यते यतोहि एतस्य प्रथमशिष्यः कलरः अस्ति। कलरः अवन्तिवर्मणः ( 855-63 ) समकालीनः वर्तते। वसुगुप्तेन प्राप्तनां शैवसूत्रणां संख्या सप्तसप्ततिः अस्ति। तच्च स्पन्धशास्त्रम् इति नाम्ना प्रसिद्धम् अस्ति । शिवसूत्रं वसुगुप्तस्य एक एव रचनास्ति । एतानि शिवसूत्राणि त्रिषु भागेषु विभाजितानि सन्ति । आव्योपायः, शाक्तोपायाः, शाम्भवोपायाः । एतेषाम् विभागानां व्यवस्थिता व्याख्या भट्टभास्करः - क्षेमराजः - वरदराजेभ्यः क्रमशः व्याख्या कृतास्ति । अपि च क्षेमराजेन शिवसूत्रेषु शिवसूत्राधारितनिर्मित - शिवसूत्रविमर्शिनी इत्यास्मिन् ग्रन्थे शैवदर्शनस्य तत्वानां सुस्पष्टा व्ययाख्या कृतास्ति।

---

92 म्लेच्छैः संछादिते देशे स तदुच्छित्तये नुपः।
तपःसंतोषिताल्लेभे भूतेशात्सुकृती सुतम् ॥. राजतरडिग्णी . 1-107

93 बौद्धभाषामजानानो माहेश्वरतया नृपः ।
को बोधिसत्त्वो यं भद्रे मां वेत्सीति जगाद ताम् ॥ राजतरडिग्णी 1-135

94 अपश्यन्निर्जलात्स्थानादकस्तादुत्थितं पयः ।
स सोदराविसंवादि वर्णास्वादादिभिर्गुणैः युग्मम् ॥ राजतरङिग्णी 1- 126

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

शिवसुत्रेषु भगवतः शिवस्य परं तत्त्वरुपेण निरुपणं विहितम् । अत्रवर्णितमस्ति यत् शिवः शक्ति - माया - प्रकृतिः - पृथ्वी इत्येभ्यः चतुर्भ्यः अङगेभ्यः सृष्टेः निर्माणं करोति। शिवे षड्त्रिशंत् तत्वानि प्रतिष्ठापनि सन्ति।

( **षङत्रिशदात्मजगत् तस्य भावः तत्वम्** ) एतानि तत्त्वनि शिवस्य अभिव्यक्तिरुपेण सन्ति । एतानि तत्त्वानि शिवे व्यापृतानि सन्ति । ( तन्नाद व्याप्तृभावतः ) षड्त्रिशंत् तत्तवेषु शिवः, शक्तिः, सदाशिवः, ईश्वरशुद्धविधा, माया, कला, विद्या, रागनियतिः एतानि प्रथमदशतत्त्वानि कश्मीराचार्याणां मौलिकचिन्तनस्य परिणामाः सन्ति। एकादशतत्त्वं वेदान्ते मायारुपेण वर्णितास्ति। अवशिष्टानि पंचविंशतितत्त्वानि सांख्यदर्शनात् स्वीकृतानि सन्ति।

**शैवदर्शनस्य विकास** –

शैवदर्शनस्य व्यवस्थितं प्रवर्तनं कश्मीरे नवमशताब्द्या आरम्भे अभवत्। आचार्य वसुगुप्तेन स्वप्ने प्राप्तशिवसूत्राणां सर्वप्रथमशिक्षा भट्टकल्लटं दत्ता । भट्टकल्लटः वसुगुप्तस्य शिष्यपरम्परायाम् आदिम अस्ति । भट्टकल्लटस्य समयःनवमशताब्द्या मध्यकाल अस्ति । शिवसूत्राणां प्रसारस्य इच्छाकारणात् भट्टकल्लटेन सपन्दकारिका इति नाम्ना एकः ग्रन्थः रचियतः यस्मिन् शिवसूत्राणां तान्त्रिकी व्याख्या प्रस्तुता अस्ति।

सपन्दकारिकाग्रन्थे एकनवति कारिकाः सन्ति । ग्रन्थोऽयम् अध्यायेषु विभक्ता अस्ति ।यच्च क्रमशः " व्यतिरेकोपपात्तिनिदेषः, व्यतिरिक्तस्वाभोपलब्धिः, विश्वस्वभावशक्त्युपत्तिः, अभेदोपलब्धि " इत्येते सन्ति। अत्र सैद्धान्तिकविवेचनस्य अपेक्षया साधनापक्षे विशेषबलं दत्तं अस्ति । यत् पतञ्जलेः निरोधात्मकयोगः हठयोगस्य हठप्रकियाभिः भिन्नम् अस्ति। शैवयोगः गूढार्थेन् परिपूर्ण अस्ति[95] ।

स्पन्दकारिकायाः दार्शनिकतां लोकप्रियः कर्तुं रामकण्ठेन ( 875 ई. ) स्पन्दसर्वस्वे स्पन्दवृतिः इत्याख्याः टीकायाः रचना कृता। क्षेमराजेन स्पन्दनिर्णयः सपन्दसंदोहः टीकाद्वय इत्यनयोः रचना कृता। सपन्दकारिकाम् अधिकृत्य – आचार्य – उत्पल्ल - वैष्णवेन् स्पन्दप्रदीपिका नाम्ना ग्रन्थस्य रचना कृता । एषा टीका विस्तृता, सारगर्भिता चास्ति अथ शैवदर्शनस्य शैवतत्वानां सारंञ्च प्रस्तौति । शिवसूत्रेषु अन्या व्याख्याः अपि च मिलन्ति। अपि च केरलनिवासी क्षेमराजस्य

[95] कश्मीर इतिहास और संस्कृति . कुसुम भूरिया दत्ता ऋषन् भारद्वाज पृष्ठ 204

Since 2010
ISSN- 0976-8645
UGC RN-41039

शिष्यः वरदराजस्य वार्तिकानि मिलन्ति । स्पन्दकारिकायाः अन्ये स्पन्दामृत स्पन्दशास्त्रञ्च मिलतः ।

**सोमानन्द –**

आचार्य वसुगुप्तस्य अनन्तरं शैवाचार्येषु द्वितीयो वर्तते शोमनन्दः। एतस्य समयः नवमीशताब्द्याः उत्तरार्धम् अस्ति। आचार्यसोमानन्दस्य सम्बन्धः देववंशेन् अस्ति। एतस्य वंशस्य प्रारम्भः शिवस्य परंभक्तदुर्वासाऋषिणा अभूत्। त्रिक्शास्त्रं लुप्तो न भवेत् एतदर्थं भगवतः शिवेन कैलाशगिरौ दुर्वासा ऋषिम् एतस्य त्रिक्शास्त्रस्य प्रचारस्य कार्यं प्रदत्तः । दुर्वासाऋषिणां त्र्यम्बकादित्य नामाख्यस्य मानस पुत्रस्य उत्पत्तिः कृता।

**ततः ल भगवान देवादादेशं प्राप्त यत्नतः ।**
**ससर्ज मानसं पुत्रं त्र्यम्बकादित्य नामकम् ।।**[96]

त्र्यम्बकादित्यः कैलाशे स्थित्वा अद्वैतपरकत्रिक्शास्त्रस्य प्रवचनं स्वशिष्यान् प्रत्यकरोत् । त्र्यम्बकादित्यस्य परापरायां चतुर्शतं वर्षानन्तरं संगमादित्यस्य आगमनम् अभवत् । संगमादित्यतः वर्षादित्यः, वर्षादित्यातः, अरुणादित्यः तस्मात् आनन्दः सोमनन्दश्च अभवताम्। [97]

शैवदर्शनस्य कैलाशपर्वतात् पृथिव्यां आनयनस्य श्रेयःसगंमादित्यम् अस्ति। तस्मात् अस्य विकासस्य स्थलं कश्मीरम् अस्ति शैवदर्शनस्य आधारः शैवागमः आसन् , येषां प्रवर्तकः महादेवः। त्र्यम्बकादित्यादिभिः एतेषु बहुशोधः कृतः। परं तस्य लिखितरुपं नासीत्। सोमनन्देन शिवदृष्टिः नामाख्यस्य अद्वितीयस्य ग्रन्थस्य रचना कृता प्रत्यभिज्ञादर्शनस्य मेरुदण्डः शिवदृष्टिः विद्वान्सः अस्तीति स्वीकुर्वन्ति। सोमानन्दस्य शिवंप्रति भक्तयाःउदाहरणम्

**शिवोदाता शिवोभोक्ता शिवः सर्वमिदं जगत्**

**उत्पलदेवः -**

त्रिकदर्शनस्य उत्थाने शीर्षस्थउघोग कर्तृषु सोमनन्दस्य पश्चात् उत्पलदेवस्य नाम श्रुयते। आचार्योत्पलदेवः लाटदेशीय् आसीत्। अयम् उदयाकरवागेश्वरयोः पुत्रः

[96] परमार्थचर्चा – अभिनवगुप्त ,
तन्त्रालोक- जयरथ 1-8
[97] शिवदृष्टि 7-114-120

Since 2010
ISSN- 0976-8645
UGC RN-41039

आसीत् तथा च आचार्यस्य सोमनन्दस्य प्रमुखशिष्यः आसीत् । एतस्य समयः नवमशताब्द्याः उतरार्धम् अस्ति । शिवदृष्टिः त्रिक्दर्शनस्य मूलम् अस्ति तथा च एतस्मिन् मूले स्थित्वा ईश्वरप्रतिज्ञादर्शनस्य भवनस्य निर्माणं भवति । ईश्वरप्रत्यभिज्ञादर्शनं शिवदृष्टेः व्याख्यास्ति यस्मिन् उत्पलदेवेन शिवदृष्टिग्रन्थस्य नवीनरुपं दतम् प्रदर्शितम् ।

ईश्वरप्रत्यभिज्ञादर्शने चत्वारः अधिकारा, षोडश- अह्निकानि एवञ्च एकनवत्याअधिकशतं कारिकाः सन्ति । अस्मिन् ग्रन्थे प्रथमाधिकारे शिवस्य ज्ञानशक्तैः विवेचनं एवञ्च बौद्धानां विज्ञावादस्य खण्डनम् अस्ति ।

द्वितीयाधिकारे परं- शिवस्य क्रियाशक्तेः तथा च तस्य विभिन्नानुभावानाविवेचनं विद्यते । तृत्तीयाधिकारे शैवदर्शनस्य षडत्रिंशत् तत्त्वानाम्, आगमानां वर्गीकरणं प्रदर्शितम् । चतुर्थाधिकारे पूर्णाधिकाराणां संक्षेपरूपं दत्वा परमशिवस्य स्वरुपं प्रकिटतमास्ति ।

शिवदृष्टिग्रन्थस्य अपेक्षया एषः ग्रन्थः महत्वपूर्णग्रन्थः अस्ति । ईश्वरप्रत्यभिज्ञादर्शनग्रन्थः वर्णलिग्ङ्जातिइत्यादिना समभाव स्थापित कृत्वा तथा जीवनस्य परमलक्ष्यं प्राप्येतुं तथा आत्मतत्वं ज्ञायातुं मार्गं प्रशस्त करोति । उत्पलदेवस्य प्रतिभायाः अनेकग्रन्थः रत्नप्रदुर्भावं प्राप्तवन्ताः तेषु शिवदृष्टि वृतिः , अजाप्रमात्रसिद्धिः , ईश्वरसिद्धिः , ईश्वरसिद्धिः वृतिः , सम्बन्धवृतिः सिद्धिः , तथा शिवस्त्रोत्ररत्नावली ग्रन्थः अन्तर्भवन्ति । शिवस्त्रोत्ररत्नावल्यां विशंतिः पद्धानि सन्ति तानि च – शवस्तुतौविरचितानिदार्शनिकपद्धानि सन्ति । ग्रन्थस्य आरम्भतः समाप्तिपर्यन्तंकविः आध्यात्मिकतयाः परिचयं ददाति । शैवाचार्येषु उत्पलदेवस्य उपरान्तं लक्ष्मणगुप्तस्य नाम आयाति ।

**अभिनवगुप्तः -**

शैवाचार्यपरम्परायाम् अभिनवगुप्तस्य नाम अग्रगण्येषु वर्तते । अभिनवगुप्तः शैवाचार्येषु ख्याति प्राप्तासीत् । अभिनवगुप्तः महामहेश्वरः इति नाम्ना उपाधिना विभुषितः आसीत् । महामहेश्वरः अर्थात् महेश्वरस्यपरं भक्तः , परंशिवः । शैवचार्यपरम्परायाम् अभिनवगुप्तः सर्वत्र प्रशंसा प्राप्नोति । तैः शैवदर्शनस्य पुनरालोकनं कृतं तथा श्रीमद्भगवद्गीतायां शैवदर्शनस्य अनुसारेण “ गीतार्थसन्ग्रहः “ इति नाम्ना भाषायाम् अपि लिखितम् । आनन्दवर्धनस्य ध्वन्यालोकः इति ग्रन्थम् अधिकृत्य लोचन नाम्ना प्रसिद्धाः टीका

Since 2010
ISSN- 0976-8645
UGC RN-41039

लिखितः तथा च भरतमुनैः नाट्यशास्त्रस्य " अभिनवभारती " इति ग्रन्थे सारः प्रस्तुतः कृतः। अभिनवगुप्तः आत्मपरिचयस्य उपेक्षां मा करोति। सः स्व जन्मस्थान विषये परिचय मालिनीविजयतन्त्रस्य वार्तिकायाःप्रथमश्लोके प्रददाति। ----

**प्रवरपुरनामधेये पुरे पूर्व कश्मीरकोअभिनवगुप्तः।**
**मालिन्यामादि मे वाक्ये वार्तिकमेतद्रचयतिस्म् ॥**

कश्मीरस्थ श्रीनगरस्य पूर्वभागः एतस्य जन्मस्थानं निश्चितं भवति । तन्त्रालोके मातुः नामः विमला तथा पितुः नामः श्रखुलकनरसिंहगुप्तः उक्तास्ति।

**" अस्य हि ग्रन्थकृतः श्रीनरसिहं गुप्तविमलाख्यौपितरौ "** [98]

अत्रिगुप्तः स्ववशें श्रेष्ठख्याति प्राप्तः आसीत्। अभिनवगुप्तः स्वग्रन्थे लिखति यत् अत्रिगुप्तः गंगायमुनायौः अन्तर्द्वीपे " अन्तरवेदयां " निवसति स्म्। अभिनवगुप्तः लिखति यत् कश्मीरस्य राजा ललितादित्यः अत्रिगुप्तस्य पाण्डित्येन प्रभीवितः भूत्वा तम् कश्मीरम् आनीतवन्तः। तस्य समयः 965तः 1015 ई. पर्यन्तं कृतिषु वर्णितम् अस्ति । तेषां रचनाषु नवदशगुरुणां वर्णनं प्राप्यते । आचार्याभिनवगुप्तस्य समयः कश्मीरे संस्कृतक्षेत्रे अद्वितिय प्रगतिं आनीतवान्। कश्मीरे धार्मिक चेतनायाः तथा संस्कृतभाषायाः प्रसारः , प्रचारः च उत्कृष्ट रुपेण अभूत्। दर्शनं , काव्यम् इत्यादिषु अत्रात्य जनानां प्रशंसा अभूत।

आचार्याभिनवगुप्तस्य एकचत्वारिशंत (41) रचनाः इति डा. के. सी स्वीकुर्वन्तः। अभिनवगुप्तेन लेखककार्यं स्वतन्त्ररुपेण कृतास्ति ।तैः कलिष्ठसिद्धान्तान् परिवर्तयित्वा शास्त्रं सम्मतं कृतं। शैवदर्शनेन् कर्मकाण्डः आदि विषयाणां योजनं कृतं तथा शैवदर्शनं लौकिकक्षेत्रे प्रवृतः जातः।

**क्षेमराजः -**

शैवाचार्यापरम्परायाम् अभिनवगुप्तस्यान्तरं तस्य प्रधान शिष्याः क्षेमराजस्य नाम वर्तते । एतस्य समयः एकादशमी शताब्दयाः उत्तरार्धः अथवा द्वादशं शताब्दयाः पूर्वाधः स्वीकुर्वन्ति। क्षेमराजस्य ख्याति शिष्यपरंपरायां सर्वत्र दर्शनयोग्यः अस्ति।

[98] तन्त्रलोक 1 - 4

Since 2010
ISSN- 0976-8645
UGC RN-41039

**"अन्येपितृत्यतनयाः शिव-शक्तिशुभ्राः क्षेमोत्पलाभिनव चक्रकपघगुप्ता"**

एतस्य नाम क्षेमः इत्यापि मिलति।--

**शाङ्करोपनिषत्सार प्रत्यभिज्ञामहोदघोः।**
**क्षेमोणोदध्रियते सारः संसारः विषशान्तये॥**[99]

शिवोपनिषदसग्रंहस्य सारभूतः प्रत्यभिज्ञादर्शनं तत्वस्य विषशान्त्यर्थं क्षेमराजः उद्धृतः अस्ति। तेषां निवास विषये स्तवचिन्तामणिग्रन्थे एकः श्लोक प्राप्यते।

**तेनार्थिप्रणयाद्वि नैस्त्रि चतुरैर्या क्षेमराजो व्यधात्।**
**क्षेत्रे श्री विजयेशश्वरस्य विमले सैषा शिवाराधनी॥100**

विजयेश्वरः इत्येना व्रिजविहारा इत्याश्य भवति यत् श्रीनगरे अस्ति तत्र अवन्तिवर्मणः विजयेश्वरस्य स्थापना तथा अन्यमन्दिराणां स्थापना कृतः। क्षेमराजस्य स्वगुरूवत् तन्त्रः , दर्शनं तथा साहित्य विशेष गति आसीत् ध्वन्यालोकग्रन्थस्य उघोत इति टीका क्षेमराजस्य साहित्य व्रवीति। कश्मीरे षष्ठी श्ताब्दयां वसुगुप्तेन शैवदर्शनस्य पुनरोदयः कृतः तथा नवमीश्ताब्दीतः त्रयोदशी श्ताब्दी पर्यन्तं कश्मीरः सम्पूर्ण भारते विस्तृतानां शैवानुयायीनां कृते महत्वपूर्ण स्थानम् असीत्।

अनेन ज्ञायते यत् कश्मीरप्रदेशः शैवमतस्य महत्त्वपूर्णं स्थानमासीत्। यदधुना लुप्तप्रायः। अयं शैवसम्प्रदायः कश्मीरस्थसनातनपरम्परायाः द्योतकोऽपि वर्तते। अतः कश्मीरे सनातनपरम्परायाः पुनर्स्थापनार्थं कश्मीरस्य शैवदर्शनसिद्धान्तस्य अनुशीलनं नितान्तमनिवार्यमिति।

---

[99] प्रत्यभिज्ञाहृदय श्लोक -2
[100] स्तवचिन्तामणि लेखक क्षेमराज श्लोक 130

Since 2010
ISSN- 0976-8645
UGC RN-41039

## सन्दर्भग्रन्थसूची


- कल्हण राजतरङ्गिणी - राम तेजस पाण्डे - चौखम्बा संस्कृत प्रतिष्ठान पुनमुद्रित संस्करण-2019.
- जोनराज कृट राजतरङ्गिणी - डॉ रघुनाथ सिंह चौखम्बा संस्कृत सीरीज आफिस, वाराणसी संस्करण प्रथम, वि. संवत् 2028
- नीलमत पुराण - पृथ्वी नाथ भट्ट - VERILY Publisher LLP. New DELHI प्रथम संस्करण 2017
- कश्मीर इतिहास और संस्कृति - कुसुम भूरिया दत्ता, ऋषन् भारद्वाज - प्रतिभा प्रकाशन दिल्ली - प्रथम संस्करण - 2008.
- काश्मीरीय शैवदर्शन एवं स्पन्दशास्त्र - डॉ. श्यामाकान्त द्विवेदी आनंद - चौखम्बा सुरभारती-वाराणसी संस्करण 2019
- नीलमत पुराण – प्रो. वेद कुमारी घई - क्लासिक प्रिंटर्ज, बाडी ब्राह्मणा, जम्मू संस्करण - 2016.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

# संस्कृतवाक्यगठने वाक्यार्थबोधे च कारकविभक्तीनां गुरुत्वम्

राजसी भट्टाचार्य्यः[101]

प्रमुखशब्दाः- विभक्तिः, उपपदम्, वाक्यम्, पदम्, व्याकरणम्

शोधसारः- वाक्यलक्षणं तावद् - 'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः'।१ योग्यताकाङ्क्षासत्तिमद्पदसमुदायो वाक्यम् । वैयाकरणैरुक्तम् - एकतिङ् वाक्यम्। अमरसिंहस्य वाक्यलक्षणं तावत् - 'सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता'। यत्र वाक्ये तिङ उपस्थितिर्न परिदृश्यते तत्रापि तिङोऽध्याहारः करणीयः। यथा बालको गृहं गतवान्। अत्र 'अस्ति' इति क्रियापदस्य अर्थात् तिङन्तपदस्य अध्याहारो भवति। बालको गृहं गतवान् अस्ति। संस्कृतवाक्ये यानि पदानि सन्ति तत्र सुबन्तपदानां तिङन्तपदस्य व्यवहारोऽस्ति । अव्ययपदानि अपि सुबन्तपदानि भवन्ति। यतः 'नापदं शास्त्रे प्रयुञ्जीत' इति न्यायोऽस्ति । वाक्ये विशेष्यपदानि सन्ति विशेषणपदानि अपि सन्ति, विशेष्यविशेषणपदयोः अपि समानविभक्तिवचनम् अपि भवति। तथा चोक्तम् –

विशेष्यस्य हि यल्लिङ्गं विभक्तिवचने च ये।
तानि सर्वाणि योज्यानि विशेषणपदेष्वपि ॥

अर्थात् विशेष्यस्य यल्लिङ्गं या विभक्तिः यच्च वचनं तिष्ठति, विशेषणपदेऽपि तल्लिङ्गं तद्विभक्तिः तद्वचनमपि भवन्ति। किन्तु उद्येश्यविधेयविषये कदाचित् व्यतिक्रमोऽपि परिदृश्यते। तथा चोक्तम् –
उद्देश्ये च विधेये च विभक्तिस्तु समा भवेत् ।
कदाचिज्जायते तत्र वैषम्यं लिङ्गसंख्ययोः॥

[101] यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य स्नातकोत्तरश्रेण्याः द्वितीयवर्षस्य छात्रा

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/II/14/2024

Since 2010
ISSN- 0976-8645
UGC RN-41039

क्रियापदमपि समापिकासमापिकाभेदेन द्विविधं भवति। अव्ययपदोत्तरं या विभक्तिर्वर्तते तस्याः लुग् भवति 'अव्ययादाप्सुपः'२ इति सूत्रेण। 'संख्याकारकादिबोधयित्री विभक्तिः'। त्रिषु विषयेषु विभक्तीनां प्रयोगो भवति। कारकयोगे या विभक्तिः सा कारकविभक्तिः। शब्दयोगे या विभक्तिः सा उपपदविभक्तिः। विशेषार्थे या विभक्तिः प्रयुज्यते सा अर्थविभक्तिः। यथा हेत्वर्थे तृतीया। अत्र सूत्रं तावत् 'हेतौ'।३ उपपदविभक्तेरुदाहरणं तावत् – नारायणाय नमः। अत्र पाणिनीयं सूत्रं तावत् - 'नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च'।४ कारकविभक्तेरुदाहरणं तावत् – शिशुः चन्द्रं पश्यति। अत्र 'चन्द्रम्' इत्यत्र 'कर्तुरीप्सिततमं कर्म'५ इति सूत्रेण कर्मसंज्ञा, 'कर्मणि द्वितीया'६ इति सूत्रेण द्वितीयाविभक्तिर्भवति।

सर्वेषां कारकाणां धात्वर्थे एव अन्वयो भवति। लघुमञ्जूषाग्रन्थे नागेशेन उक्तम् – 'तत्र सर्वकारकाणां धात्वर्थेऽन्वयः'।७ अत एव कारकलक्षणं तावत् 'क्रियाजनकत्वं कारकत्वम्'। क्रियां करोति, सम्पादयति, निष्पादयति, निर्वर्तयति, जनयति इति कारकम्। क्रियापदस्य प्राधान्यं वैयाकरणाः स्वीकुर्वन्ति। एतेषां मते क्रियामुख्य-विशेष्यकशाब्दबोधो भवति। नामशब्द आख्याताद् उत्पद्यते। निरुक्तग्रन्थे शाकटायनमतम् उद्धृतं भवति। 'सर्वाणि नामान्याख्यातजानि' इति शाकटायने। नैरुक्तसमयश्च८ पतञ्जलिना अपि उक्तम् - 'नाम च धातुजमाह निरुक्ते'।९ अत्र आख्यातशब्देन धातुरेव बोध्यो भवति। अत्र प्रमाणरूपेण शाकपूणिमतस्य उल्लेखो निरुक्तग्रन्थे विद्यते - 'त्रिभ्य आख्यातेभ्यो जायते इति शाकपूणिः।'१० क्रियया सह नामार्थस्य सम्बन्ध एव कारकम्। स प्रधानतया साक्षाद्रूपेण भवति। क्रिया साध्यो भवति, कारकः साधनं भवति। साधनसमुद्देशे भर्तृहरिणा तत् प्रतिपादितम्। क्रियासिद्ध्यर्थं कारकाणाम् आवश्यकता वर्तते। क्रियाया अभावे कारकस्य विद्यमानता न भवति तथैव कारकस्य अभावे क्रियाया विद्यमानता अपि न भवति। अतः अनयोः आवश्यकता अतीव वर्तते। अत एव भाष्यकारेणोक्तम् - 'कारकाणां प्रवृत्तिविशेषः क्रिया'।११ किन्तु नामार्थेन सह नामार्थस्य सम्बन्धो कारकं न भवति। नामार्थशब्देन अत्र क्रियाभिन्नशब्दमात्रस्य ग्रहणं भवति। तेन निपातकर्मप्रवचनीय-उपसर्गादीनां ग्रहणं भवति। अत एव गुरवे नमः, पुत्रेण सहागतः पिता, ज्ञानं विना सुखं नास्ति इत्यादिषु वाक्येषु गुरु-पुत्र-ज्ञानशब्दानां न कारकत्वम्। 'क्रियान्वयित्वं कारकत्वम्' इत्यपि कारकलक्षणं वर्तते। अस्मिन् कारकलक्षणे - 'शीघ्रं धावति' इत्यत्र अतिव्याप्तिर्भवति। 'शीघ्रम्' इति पदं क्रियाविशेषणम्। अनेन सह क्रियायाः

Since 2010
ISSN- 0976-8645
UGC RN-41039

साक्षादन्वयो भवति। किन्तु क्रियाविशेषणं कदापि न कारकं भवति। कारकचक्रग्रन्थे भवानन्देन अस्मिन् लक्षणे विशेषणयोगेन अस्य लक्षणस्य परिष्कारः कृतः। तेन उक्तम् - 'विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्'। 'स्तोकं पचति' इत्यत्र क्रियाविशेषणे 'स्तोकम्' इति पदे स्तोकपदोत्तरविभक्तेरर्थो न अभेदार्थकः अपि तु साधुत्वार्थकः। अत एव विभक्त्यर्थो न कर्मत्वम्। अत एव शब्दशक्तिप्रकाशिकायामुक्तम् - 'द्वितीया तु तत्र क्लीवलिङ्गत्ववदानुशासनिक्येव'।१२ अपरं कारकलक्षणं तावत् 'धात्वर्थांशे प्रकारो यो सुबर्थः सोऽत्र कारकम्'। शब्दशक्तिप्रकाशिकायाम् इदं कारकलक्षणं स्वीकृतम्। अत एव शब्दशक्तिप्रकाशिकायाम् उक्तम् - 'यद् धातूपस्थाप्य यादृशार्थेऽन्वयप्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्य तादृशक्रियायां कारकम्'।१३ अपरं कारकलक्षणं तावत् 'अपादानाद्यन्यतमत्वं कारकत्वम्'। कारकं अपादान-सम्प्रदान-करणाधार-कर्म-कर्तृभेदेन षड्विधं भवति। कर्तृकारकविषयकं पाणिनीयं सूत्रं तावत् –'स्वतन्त्रः कर्ता'१४ नागेशेनोक्तं कर्तृकारकलक्षणं तावत् – प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम्। भर्तृहरिणोक्तम् - 'धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते'। कर्मलक्षणं नागेशेनोक्तं - 'कर्मत्वं च प्रकृतधात्वर्थप्रधानीभूत-व्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्'। प्रकृत-धात्वर्थप्रधानीभूतो यो व्यापारस्तत्प्रयोज्यं यत् प्रकृतधात्वर्थफलं तत्फलाश्रयत्वेनोद्देश्यत्वमित्यर्थः। पाणिनीयव्याकरणे कर्मसंज्ञाविधायकानि बहूनि सूत्राणि वर्तन्ते। तेषु 'कर्तुरीप्सिततमं कर्म'१५ इति सूत्रम् अन्यतमम्। इदं पाणिनिसूत्रमवलम्ब्य एव नागेशेन कर्मलक्षणं कृतम्। यथा – माषेषु अश्वं बध्नाति। 'तथायुक्तञ्चानीप्सितम्',१६ 'अकथितञ्च',१७ 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ'१८ एतानि सूत्राणि अपि कर्मसंज्ञाविधायकानि भवन्ति।

करणकारकलक्षणं नागेशेनोक्तम् – 'स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम्। इदमेव साधकतमत्वम्'। भर्तृहरिणापि उक्तम् –

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।।१९

करणस्य उदाहरणं तावत् – रामेण वाणेन हतो बाली। अस्मिन् वाक्ये वाणस्य करणत्वम्। एवञ्च यद्व्यापाराव्यवधानेन फलनिष्पत्तिस्तत्त्वं करणत्वम् इति। अत्र पाणिनिसूत्रं तावत् - 'साधकतमं करणम्'।२०

Since 2010
ISSN- 0976-8645
UGC RN-41039

सम्प्रदानकारकलक्षणं नागेशेनोक्तम् - 'क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत्कारकं तत्त्वं सम्प्रदानत्वम्'। क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' इति वार्त्तिकार्थग्रहणाय नागेशलक्षणे मात्रपदोपादानम्। अत्र पाणिनीयसूत्रं 'कर्मणा यमभिप्रैति स सम्प्रदानम्'।२१ वार्त्तिकञ्च - 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्'। यथा – ब्राह्मणाय गां ददाति। अत्र दानक्रिया कर्मीभूतगोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्यः। गोब्राह्मणयोः स्वस्वामिभावः सम्बन्धोऽस्ति। सम्प्रदानचतुर्थ्यर्थस्तावद् उद्देश्यः। क्रियाया यत्कर्म तत्सम्बन्धजन्यफलाश्रयत्वेनेच्छाविषयत्वम् उद्देश्यत्वम्। अत एव पाणिनिसूत्रार्थस्तु एवं भवति – कर्मप्रतियोगिक-सम्बन्धप्रकारककर्तृवृत्तीच्छानिरूपित-विशेष्यतात्मकविशेष्यताश्रयो यः स सम्प्रदानम्। अत एव ब्राह्मणाय गां ददाति इति वाक्यस्य शाब्दबोधस्तावत् – ब्राह्मणोद्देश्यकं गोकर्मकं दानम्। पत्ये शेते इत्यस्य शाब्दबोधस्तावत् पत्युद्देश्यकं नायिकाकर्तृकं शयनम्। एवं 'रुच्यर्थानां प्रीयमाणः',२२ 'श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः',२३ 'धारेरुत्तमर्णः',२४ क्रुध-द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः',२५ 'राधीक्ष्योर्यस्य विप्रश्नः',२६ 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता',२७ 'अनुप्रतिगृणश्च',२८ 'परिक्रयणे सम्प्रदानमन्यतरस्याम्',२९ एतैः सूत्रैरपि सम्प्रदानसंज्ञा भवति।

नागेशेनोक्तम् अपादानकारकलक्षणम् - 'तत्तत्कर्तृसमवेत-तत्तत्क्रियाजन्य-प्रकृतधात्ववाच्य-विभागाश्रयत्वमपादानत्वम्'। अत्र पाणिनिसूत्रं तावद् 'ध्रुवमपायेऽपादानम्'।३० ध्रुवम् अवधित्वम्। अपायो विश्लेषः। विश्लेषे ध्रुवमवधिभूतं कारकम् अपादानं स्यात्। प्रकृतधात्वर्थप्रधानीभूत-व्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वम्। विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव, किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि वा। यथा – माथुराः पाटुलिपुत्रकेभ्य आढ्यतरा इत्यत्र बुद्धिकल्पितापायाश्रयणेनैव भाष्ये अपादानत्वम् उक्तम्। ध्रुवशब्दस्य अर्थविषये एका भाष्यकारिका अत्र वक्तव्या –

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥

पतनविषये यः अविचलो भवति अर्थात् गमनक्रियां प्रति यस्य अगमनम्, पतनक्रियां प्रति यस्य अपतनं भवति स एव ध्रुवो भवति। तेन ग्रामाद् आयाति, धावतः अश्वात् पतति इत्यादि सिद्धं भवति। इति पुरुषोत्तमदेवस्य आशयः। 'परस्परान् मेषावपसरतः'

Since 2010
ISSN- 0976-8645
UGC RN-41039

इति वाक्ये प्रत्येकं मेषः ध्रुवः, कर्ता च। एकः मेषः अपराद् मेषाद् अपसरति। अपरश्च मेषः अपराद् मेषाद् अपसरति। एतद्विषये भर्तृहरिणा उक्तम् –

अभेदेन क्रियैका तु द्विसाध्या चेद्विवक्षिता।
मेषावपाये कर्तारौ यद्यन्यो विद्यतेऽवधिः॥३१

शब्दकौस्तुभग्रन्थे दीक्षितेन उक्तम् - 'तथा परस्परान् मेषावपसरत इत्यत्र सृधातुना गतिद्वयस्याप्युपादानात् एकमेषनिष्ठां गतिं प्रत्यपरस्यपादानत्वं सिध्यति'।३२ 'भीत्रार्थानां भयहेतुः'३३ इति सूत्रेणापि अपादानसंज्ञा भवति। भीश्च त्राश्च, भीत्रौ, भीत्रौ अर्थौ येषां (धातूनां) तेषां भीत्रार्थानाम्। क्विप्प्रत्ययान्तभीः, त्राश्च। भयार्थानां त्राणार्थानां च धातूनां प्रयोगे भयहेतुः अपादानं स्यात्। यथा चोराद् बिभेति। अत्र भयहेतुत्वात् चोरस्य अपादानत्वम्। भयशब्दस्य अर्थः कैयटतमते आकुलीभावः, गदाधरमते अनिष्टसम्भावना, नागेशमते अनिष्टज्ञानम् इति। वैयाकरणमते बोधश्च भवति। चोरापादानकम् अनिष्टज्ञानम्। अथवा अनिष्टपरिहारः। भयहेतुः अनिष्टहेतुः अथवा अनिष्टजनकः। अनिष्टसम्भावनाया अपादानं भवति गदाधरमते। अत एव 'मित्राद् बिभेति' इत्यत्र मित्रस्य अपादानत्वं सम्भवति। बुद्धिकृतमपायमाश्रित्य भाष्यकारेण 'भीत्रार्थानां भयहेतुः' इत्यादिपाणिनीयसप्तसूत्राणि प्रत्याख्यानि। तानि सूत्राणि तावत् 'भीत्रार्थानां भयहेतुः', 'पराजेरसोढः',३४ 'वारणार्थानामीप्सितः',३५ 'अन्तर्धौ येनादर्शनमिच्छति',३६ 'आख्यातोपयोगे',३७ 'जनिकर्तुः प्रकृतिः',३८ 'भुवः प्रभवः'३९ इति। 'कस्य विभ्यति देवाश्च जातरोषस्य संयुगे' इति वाल्मीकिप्रयोगे अपादानस्य अविवक्षायाम्, शेषत्वविवक्षायाञ्च षष्ठी भवति, न तु अपादानम्। अत्र 'कस्य संयुगे' एतादृशोऽन्वयो भवति। अत्र 'संयुगे' इत्यत्रापि अपादानस्य शङ्का न भवति, अपादानस्य बाधकम् अधिकरणं भवति।

'अधिक्रियन्ते (क्रिया) यस्मिन्' अर्थात् क्रियाया आश्रयः अधिकरणं भवति। 'आधारोऽधिकरणम्'४० इति पाणिनिसूत्रेण अधिकरणसंज्ञा भवति। अत्र प्रश्नो जायते क्रियाया आश्रयः कदापि अधिकरणं न भवति। क्रियायाः आश्रयः कदापि कर्ता भवति, कदापि कर्म च भवति। अत्र उच्यते साक्षात्सम्बन्धेन क्रियाश्रयः कर्ता भवति, अथवा कर्म भवति। किन्तु परम्परासम्बन्धेन क्रियाया आश्रयः अधिकरणं भवति। अत एव दीक्षितेन अस्य सूत्रस्य व्याख्यानावसरे उक्तम् - 'कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञः स्यात्'। भर्तृहरिणा अपि उक्तम् –

कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम्।

Since 2010
ISSN- 0976-8645
UGC RN-41039

उपकुर्वन्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।४१

व्यापाराश्रयत्वं कर्तृत्वम्, फलाश्रयत्वं कर्मत्वम्। धात्वर्थः व्यापारः फलञ्च भवति। 'पचति' इत्यत्र पच् धातोरर्थः फुत्कारत्वादिव्यापारः, पच्-धातोरर्थः विक्लृत्त्यादिफलम्। 'देवदत्तः तण्डुलं पचति' इत्यत्र व्यापाराश्रयो देवदत्तो भवति, अत एव स एव कर्ता। फलाश्रयः तण्डुलो भवति, अत एव स कर्म भवति। 'देवदत्तः गृहे स्थाल्यां तण्डुलं पचति' इति वाक्ये व्यापाराश्रयः खलु गृहम्। अत एव गृहस्य अधिकरणसंज्ञा। फलाश्रयः खलु स्थाली। अत एव स्थाल्याः अधिकरणसंज्ञा भवति। नागेशभट्टेन परमलघुमञ्जूषायाम् अधिकरणस्य निर्वचनम् एवं कृतम् - 'कर्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम्'। धात्वर्थः फलं व्यापारश्च समवाययम्बन्धेन कर्मणि कर्तरि च तिष्ठति। पुनः स कर्म कर्ता च संयोगसम्बन्धेन यत्र तिष्ठति सः एव आधारः। एवं रूपेण क्रिया परम्परासम्बन्धेन अर्थात् स्वसमवायिसंयोगसम्बन्धेन आधारे वर्तते। साक्षात्क्रियाया आश्रयः अधिकरणं न भवति। अत्र कारणं वर्तते 'कर्तुरीप्सिततमं कर्म', 'स्वतन्त्रः कर्ता' इति कर्मसंज्ञाविधायकं कर्तृसंज्ञाविधायकं च सूत्रद्वयं वर्तते। एताभ्यां सूत्राभ्याम् अधिकरणसंज्ञा बाधिता भवति सूत्रद्वयस्य अधिकरणसंज्ञायाः परत्वात्। एतेन ज्ञापयति परम्परासम्बन्धेन क्रियाश्रयत्वं अधिकरणत्वं भवति, न तु साक्षात्सम्बन्धेन क्रियाश्रयत्वम्। परमलघुमञ्जूषाग्रन्थे 'मैत्रः गृहे स्थाल्यां तण्डुलं पचति' इति वाक्यस्य शाब्दबोधः एवं प्रदर्शितः - 'स्थाल्यधिकरणिका या ओदननिष्ठा विक्लृत्तिः तदनुकूलो गृहाधिकरणको मैत्रकर्तृको व्यापारः'।

अधिकरणं त्रिप्रकारं भवति। अभिव्यापकम्, औपश्लेषिकम्, वैषयिकं च। शब्दयोर्मध्ये औपश्लेषिकः सम्बन्धः वर्तते। भाष्यकारेण 'इको यणचि'४२ सूत्रस्य व्याख्यानावसरे उक्तम् - 'अधिकरणं नाम त्रिप्रकारम् – व्यापकम्, औपश्लेषिकम्, वैषयिकम् इति। शब्दस्य शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्। इको यणचि अच्युपश्लिष्टस्येति'।४३ व्यापकाधिकरणस्य अपरं नाम अभिव्यापकाधिकरणम्। आधेयपदार्थेन सह समवायसम्बन्धेन तिष्ठति। अर्थात् यत्र सर्वावयवावच्छेदेन व्याप्तिस्तत् अभिव्यापकाधिकरणम्। यथा तिलेषु तैलम्, घटे रूपम्, आत्मनि ज्ञानम्, समुद्रे लवणम्, आधेये आधेयता, अवच्छेदके अवच्छेदकता अपि समवायसम्बन्धेन वर्तते, अत एव अत्र अभिव्यापकाधिकरणं भवति। 'तिलेषु तैलम्' इत्यत्र अवयविनि तिले समवायसम्बन्धेन तिलं वर्तते। तिलं

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

व्यापकम्। अत एव अभिव्यापकाधिकरणं भवति। अभिव्यापकम् एव मुख्यम्। आधेयं विना आधारस्य विद्यमानता नास्ति। कर्तुः आधारः कर्मणश्च आधारः। उपश्लेषः एकदेशमात्रसम्बन्धः। उपश्लेषे भवः=औपश्लेषिकः। अनया व्युत्पत्त्या आधारस्य एकदेशे आधेयः तिष्ठति। आधार एव औपश्लेषिको भवति। 'देवदत्तः कटे आस्ते' इत्यत्र परम्परासम्बन्धेन आस्तेक्रियायाः आश्रयः कटः। क्रियाया साक्षात्सम्बन्धेन आश्रयो भवति देवदत्तः। अत एव देवदत्तः कर्ता। देवदत्तः संयोगसम्बन्धेन कटे वर्तते। व्यापाराश्रयः कर्ता। बालमनोरमाकारेणोक्तम् – उपश्लेषः संयोगादिसम्बन्धः। आदिशब्देन समवायोऽपि बोध्यो भवति। 'भूतले घटाभावः' इत्यत्र स्वरूपसम्बन्धेन अभावो भूतले वर्तते। अत एव भूतलम् औपश्लेषिकाधिकरणम्। घटाभावो भूतलस्य एकदेशे वर्तते। आत्मनि ज्ञानम् उत्पद्यते, आकाशे शब्दो जायते इत्यादिषु समवायसम्बन्धेन आत्मादयः औपश्लेषिकाधिकरणम्।

वैषयिकस्य आधारस्य उदाहरणं तावत् – मोक्षे इच्छा अस्ति। अत्र विषयतासम्बन्धेन मोक्ष इच्छाया आधारः। विषयतासम्बन्धो न वृत्तिनियामकसम्बन्धः। एवं धर्मे मतिरस्तु। देवे भक्तिरस्तु।

अधुना विभक्तिविधानविषये संक्षेपेण आलोच्यते। प्रथमाविभक्तिविधायकं सूत्रद्वयं वर्तते – 'प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा',४४ 'सम्बोधने च'।४५ वार्त्तिकं वर्तते 'क्वचिन्निपातेनाभिधानम्'(वा.)। द्वितीयाविभक्तिविधायकानि सूत्राणि तावत् - 'कर्मणि द्वितीया'। वार्त्तिकम् –

उभसर्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।४६

'अभितपरितसमयानिकषाहाप्रतियोगेऽपि'४७ एवं बहूनि वार्त्तिकानि सन्ति। एभिः वार्त्तिकैः द्वितीयाविभक्तिर्भवति। 'कर्मप्रवचनीययुक्ते द्वितीया' इति सूत्रेण द्वितीयविभक्तिर्भवति।

'कर्तृकरणयोस्तृतीया'४८ इति सूत्रेण अनभिहिते कर्तरि करणे च तृतीयाविभक्तिर्भवति। अनेन कारकविभक्तिर्भवति। 'सहयुक्तेऽप्रधाने',४९ 'येनाङ्गविकारः',५० 'इत्थम्भूतलक्षणे',५१ 'संज्ञोऽन्यतरस्यां कर्मणि'५२ एभिः सूत्रैः तृतीयाविभक्तिर्भवति। एताः खलु उपपदविभक्तिः। 'हेतौ',५३ 'अपवर्गे तृतीया'५४ आभ्यां सूत्राभ्यां तृतीयाविभक्तिर्भवति। आभ्यां विशेषार्थे तृतीयाविभक्तिर्भवति।

Since 2010
ISSN- 0976-8645
UGC RN-41039

'चतुर्थी सम्प्रदाने'५५ इत्यनेन सम्प्रदानकारके चतुर्थीविभक्तिर्भवति। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'५६ इत्यनेन कर्मणि चतुर्थीविभक्तिर्भवति। 'तुमर्थाच्च भाववचनात्'५७ इत्यनेन चतुर्थीविभक्तिर्भवति। एषा खलु उपपदविभक्तिः। 'नमः स्वस्ति-स्वाहा-स्वधालंवषड्योगाच्च'५८ एतेन चतुर्थीविभक्तिर्भवति। एषा अपि उपपदविभक्तिः।

'अपादाने पञ्चमी'५९ इति सूत्रेण अपादानकारके पञ्चमी विभक्तिर्भवति। 'पञ्चम्यपाङ्परिभिः',६० 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'६१ एताभ्यां सूत्राभ्यां पञ्चमीविभक्तिर्भवति। एषा उपपदविभक्तिः। 'अकर्तर्यृणे पञ्चमी',६२ 'विभाषा गुणेऽस्त्रियाम्'६३ एताभ्यां सूत्राभ्यां पञ्चमीविभक्तिर्भवति। एषा अर्थविभक्तिः।

'सप्तम्यधिकरणे च'६४ इति सूत्रेण सप्तमीविभक्तिर्भवति। एषा कारकविभक्तिः। 'यस्य च भावेन भावलक्षणम्',६५ 'षष्ठी चानादरे',६६ 'आयुक्तकुशलाभ्यां चासेवायाम्',६७ 'यतश्च निर्धारणम्'६८ इत्यादिसूत्रैः सप्तमीविभक्तिर्भवति।

'षष्ठी शेषे'६९ इति सूत्रेण षष्ठीविभक्तिर्भवति। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। उक्ताद् अन्यः शेषः। सामान्यविशेषभेदेन सम्बन्धः द्विविधः। प्रातिपदिकयोः सम्बन्धः सामान्यसम्बन्धः। क्रियया सह प्रातिपदिकस्य सम्बन्धः विशेषसम्बन्धः। विशेषसम्बन्धे बोधिते द्वितीयादिकारकविभक्तिर्भवति। सामान्यसम्बन्धे बोधिते षष्ठीविभक्तिर्भवति। अत एव शेषे षष्ठी सम्बन्धे षष्ठी एव। अयं सम्बन्धो बहुविधो भवति। तथापि वैयाकरणाः सम्बन्धः चतुर्विध इति वदन्ति।

स्वस्वामी जन्यजनकोऽवयवावयवी तथा।
स्थान्यादेश इति प्रोक्तः सम्बन्धश्चोपचारतः॥

यथा – राज्ञः पुरुषः। अत्र राज्ञः पदार्थे स्वामित्वं वर्तते, पुरुषः इति पदस्य अर्थे स्वत्वं वर्तते। अत्र राजन् विशेषणम्। अत एव राजन्-शब्दात् षष्ठी भवति। 'षष्ठी हेतुप्रयोगे',७० 'सर्वनाम्नस्तृतीया च',७१ 'षष्ठ्यतसर्थप्रत्ययेन',७२ 'दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्',७३ 'ज्ञोऽविदर्थस्य करणे',७४ 'अधीगर्थदयेशां कर्मणि',७५ 'कृञः प्रतियत्ने'७६ इत्यादिसूत्रैः षष्ठीविभक्तिर्भवति। 'कर्तृकर्मणोः कृति',७७ 'उभयप्राप्तौ कर्मणि',७८ 'क्तस्य च वर्तमाने',७९ 'अधिकरणवाचिनश्च'८० इत्यादिसूत्रैः षष्ठीविभक्तिर्भवति।

वाक्यार्थबोधे कारकविभक्तीनां महत्त्वं वर्तते। वाक्यघटकपदानां ये अर्थाः सन्ति तेषां संसर्गज्ञानं शाब्दबोधः। वाक्यस्थितेषु पदार्थेषु एकं मुख्यं विशेष्यपदं वर्तते। अन्ये

Since 2010
ISSN- 0976-8645
UGC RN-41039

पदार्थाः विशेषणतया भासन्ते। तत्र वैयाकरणमते धात्वर्थः व्यापार एव मुख्यविशेष्यतया भासते। एतेषां मते 'चैत्रो ग्रामं गच्छति' इति व्याक्यात् 'चैत्राभिन्नैककर्तृकग्रामनिष्ठसंयोगजनको व्यापारः' इति वाक्यार्थबोधो भवति। नैयायिकमते किन्तु प्रथमान्तार्थमुख्यविशेष्यतया शाब्दबोधो भवति। एतेषां मते 'चैत्रो ग्रामं गच्छति' इति व्याक्यात् 'ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृत्याश्रयः चैत्रः' शाब्दबोधः।

मीमांसाकमते 'आख्यातार्थकृतिरेव मुख्यविशेष्यतया भासते'। एतन्मते 'चैत्रो ग्रामं गच्छति' इति वाक्यात् 'चैत्रनिष्ठा ग्रामसंयोगानुकूलव्यापारानुकूला कृतिः' इति शाब्दबोधो भवति। अत एव वाक्यघटकस्य कर्तृपदस्य, कर्मपदस्य, करणपदस्य, सम्प्रदानपदस्य, अपादानस्य, अधिकरणस्य च पदस्य ज्ञानम् अपेक्षितं भवति। व्याकरणमते पदमेव शक्तम्, न तु वाक्यम्। पदार्थानां संसर्गः एव आकाङ्क्षाभास्यो भवति।

एवं रूपेण कारकविभक्तीनां गुरुत्वं यथा वाक्यगठने वर्तते, तथैव वाक्यार्थबोधेऽपि अपेक्षितं वर्तते।

**सङ्केतसूची**

निरु. = निरुक्तम्
प. = पत्राङ्कः
पा.सू. = पाणिनीयसूत्रम्
म. भा. = महाभाष्यम्
वा. प. = वाक्यपदीयम्
ल. म. = लघुमञ्जूषा
श. कौ. = शब्दकौस्तुभः
श. श. प्र. = शब्दशक्तिप्रकाशिका
सम्पा. = सम्पादकः
सा. द. = साहित्यदर्पणः

**अन्तटिप्पणी**

१. सा. द., द्वितीयपरिच्छेदः, प.-२१।
२. पा. सू. २/४/८२।

Since 2010
ISSN- 0976-8645
UGC RN-41039

३. तदेव, २/२/३।
४. तदेव, २/३/१।
५. तदेव, १/४/४।
६. तदेव, २/३/।
७. ल. म., प. –५४४।
८. निरु. – १/१२।
९. म. भा. -३/३/२।
१०. निरु. - ७/१४।
११. म. भा. –२, प. –१२३।
१२. कारिका –६७।
१३. श. श. प्र. , प. –२९४।
१४. पा. सू. १/४/५४।
१५. तदेव, १/४/४९।
१६. तदेव, १/४/५०।
१७. तदेव, १/४/५१।
१८. तदेव, १/४/५२।
१९. वा. प. -३/७/९०।
२०. पा.सू. १/४/४२।
२१. तदेव, १/४/३२।
२२. तदेव, १/४/३३।
२३. तदेव, १/४/३४।
२४. तदेव, १/४/३५।
२५. तदेव, १/४/३७।
२६. तदेव, १/४/३९।
२७. तदेव, १/४/४०।
२८. तदेव, १/४/४१।
२९. तदेव, १/४/४४।
३०. तदेव, १/४/२४।
३१. वा.प. –३/७/१४२।
३२. श.कौ. २, प.- ११५।

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) संस्थापकः- Dr. Bipin Kumar Jha
Available at jahnavisanskritejournal.in Issue 54 Vol- II Year 14. Date -20 Aug, 2024, Pejawar Math, Karnataka
JSEJ/54/I|/14/2024
Since 2010
ISSN- 0976-8645
UGC RN-41039

३३. पा.सू. १/४/२५।
३४. तदेव, १/४/२६।
३५. तदेव, १/४/२७।
३६. तदेव, १/४/२८।
३७. तदेव, १/४/२९।
३८. तदेव, १/४/३०।
३९. तदेव, १/४/३१।
४०. तदेव, १/४/४५।
४१. वा.प. ३/७/१४८।
४२. पा.सू. ६/१/७६।
४३. म. भा. – ५, प.- ७४।
४४. पा.सू. २/३/४६।
४५. तदेव, २/३ ४७।
४६. वा. १५५५।
४७. तदेव, १५५२-१५५३।
४८. पा.सू. २/३/१८।
४९. तदेव, २/३/१९।
५०. तदेव, /३/२०।
५१. तदेव, २/३/२१।
५२. तदेव, २/३/२२।
५३. तदेव, २/३/२३।
५४. तदेव, २/३/६।
५५. तदेव, २/३/१३।
५६. तदेव, २/३/१४।
५७. तदेव, २/३/१५।
५८. तदेव, २/३/१६।
५९. तदेव, २/३/२८।
६०. तदेव, २/३/१०।
६१. तदेव, २/३/३२।
६२. तदेव, २/३/२४।

Since 2010
ISSN- 0976-8645
UGC RN-41039

६३. तदेव, २/३/२५।
६४. तदेव, २/३/३६।
६५. तदेव, २/३/३७।
६६. तदेव, २/३/३८।
६७. तदेव, २/३/४०।
६८. तदेव, २/३/४१।
६९. तदेव, २/३/५०।
७०. तदेव, २/३/२६।
७१. तदेव, २/३/२७।
७२. तदेव, २/३/३०।
७३. तदेव, २/३/३४।
७४. तदेव, २/३/५१।
७५. तदेव, २/३/५२।
७६. तदेव, ३/१/४०।
७७. तदेव, २/३/६५।
७८. तदेव, २/३/६६।
७९. तदेव, २/३/६७।
८०. तदेव, २/३/६८।

## सन्दर्भग्रन्थसूची

- अशोकचन्द्रगौढशास्त्री। संस्कृतव्याकरणेतिहासविमर्शः। वाराणसी: भारतीय विद्या संस्थानम्, १९९७।
- जगदीशतर्कालंकारः। शब्दशक्तिप्रकाशिका। सम्पा. ढुण्डिराजशास्त्री। वनारस: जयकृष्णदास हरिदास गुप्तः, १९३४। (हरिदास संस्कृत ग्रन्थमाला १०९)।
- तारानाथतर्कवाचस्पतिः। वाचस्पत्यम्। नइ दिल्ली: राष्ट्रिय-संस्कृत-संस्थानम्, २००६।

Since 2010
ISSN- 0976-8645
UGC RN-41039


- पतञ्जलिः। महाभाष्यम् । सम्पा. श्रीभार्गवशास्त्री भिकाजी योशी। दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान।
- पाणिनिः। अष्टाध्यायी। सम्पा. गोपालदत्तपाण्डेयः। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१७। (चौखम्बा सुरभारती ग्रन्थमाला १९)।
- ____। _____। सम्पा. तपनशङ्कर-भट्टाचार्य्यः। कलकाता: संस्कृत वुक् डिपो, २००५।
- भर्तृहरिः। वाक्यपदीयम्। सम्पा. क्षेत्रेशचन्द्र-चट्टोपाध्यायः। वाराणसी: वारणसी संस्कृत विश्वविद्यालयः, १९६३। (सरस्वतीभवनग्रन्थमाला ९१)।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा। वाराणसी: मोतिलाल वनारसी दासः, १९९७ (पुनर्मुद्रणम्) ।
- -------। शब्दकौस्तुभः। सम्पा. विन्ध्येश्वरीप्रसाद द्विवेदी, गणपतिशास्त्री मोकाटे। वाराणसी: चौखम्बा संस्कृत सीरीज आफिस, १९९१। (चौखम्बा संस्कृत सीरीज २)।
- वामन-जयादित्यः। काशिका। सम्पा. जयशङ्करलाल त्रिपाठी। वाराणसी: तारा वुक् एजेन्सी, १९९०।
- विश्वनाथकविराजः। साहित्यदर्पणः। सम्पा. विमलाकान्तमुखोपाध्यायः। कलकाता: संस्कृत पुस्तक भाण्डार, २००८।